*S V University Oriental Se  No 20*
*General Editor*  Director,  J O R Institute

ŚRĪŚAILASŪRI'S

# DĀSACARITAM

*Edited by*

**T. ANANTHANARAYANA**
Research Assistant in Sanskrit
S V. U Oriental Research Institute

*Published by*

Dr M SRIMANNARAYANA MURTI
Director

SRI VENKATESWARA UNIVERSITY
**ORIENTAL RESEARCH INSTITUTE**
**TIRUPATI**
**1989**

*S. V. University Oriental Series No. 20*

साधारणसम्पादकः निदेशकः, प्राच्यपरिशोधनालयः

श्रीशैलसूरिविरचितं

# दासचरितम्


सम्पादकः

**तोपा अनन्तनारायणः**

परिशोधकसहायकः

श्रीवेङ्कटेश्वरविश्वविद्यालयप्राच्यपरिशोधनालयः



प्रकाशकः

**डा. एम्. श्रीमन्नारायणमूर्तिः**

निदेशकः

**श्रीवेङ्कटेश्वरविश्वविद्यालयप्राच्यपरिशोधनालयः**

तिरुपति

१९८९

First Edition : 1989

Copies : 500



*This book is printed with the Grant-in-Aid under Central Government Scheme of Financial Assistance to Voluntary Organisations, Educational Institutions, Libraries, etc., for Preservation, Listing, Cataloguing, Evaluation, and Publication of Manuscripts*

*Copies can be had from*

The Librarian,
Sri Venkateswara University,
TIRUPATI - 517 502.

Printed at :

Elango Achukoodam,
166, Royapettah High Road,
Mylapore, Madras - 600 004.

**Prof. Dr. D. SRIDHARA BABU,**
Director-in-charge,
S. V. U. Oriental Research Institute,
Tirupati - 517 502.

# PREFACE

I am very happy to introduce to the scholarly world, a new Sanskrit Kāvya, called Dāsacaritaṁ running into 16 cantos, written by Śrīśailasūri. This Kāvya depicts and describes the Viśistādvaita school of philosophy in general and Śrivaisnava tradition in particular The very name of the Kāvya itself indicates its Śrīvaiṣnava nature. This Kāvya is peculiar in so many respects—

1. This is the only Palm-leaf Manuscript available in South India which is deposited in the S.V.U. Oriental Research Institute Manuscripts Collection (Stock No. 6531).

2. This is a metrical composition in Sanskrit about *aṣtottara-śata-divya-deśas* which are considered to be holy and sacred places for pilgrimage in Śrīvaisnava religious tradition.

3. The author Śrīśailaśūrı, is a great scholar-poet, which is evidenced by his sanskritisation of so many Tamil place names and words in the Kāvya.

4 The author's name may be seen at the end of the Kāvya, in three ślokas, which shows his unassuming nature of a true Vaisnavaite.

The actual plot of the Kāvya is very simple. A Vaiśya called Lakṣmaṇadāsa had a guru called

Srīrangalakṣmanamuni, who initiated him and his wife into Vaiṣnavism After receiving the blessings from his guru Lakṣmanadāsa starts for pilgrimage to the 108 sacred centres in the Śrīvaiṣnava cult. The Kāvya ends with the '*Arcirādi-gamana*' (the liberated soul going to Vaikuntha after piercing through the Sūryamandala)which is a philosophical tenet(*rahasya*) in Viśiṣṭādvaita philosophy. In this context Vedānta-Deśika, belonging to Vadagalai-sampradāya, who has written a *rahasya-grantha* called *Arcirādi* is euologised.

Sri T Ananthanarayana of our Institute has brought out the critical edition of this unique Kāvya basing on one palm-leaf Manuscript deposited in our Manuscripts Library. The editor is to be complemented for his laudable effort in this work.

In this connection, I thank the Government of India for providing the finances towards the publication of this work as a part of their scheme sanctioned to the Oriental Research Institute of S. V. University.

Tirupati
1-12-1988

**D. Sridhara Babu**

---

We regret to keep on record the sudden demise of our beloved friend and colleague Dr D Sridhara Babu on 20-12-1988.

—Director

**डा. एन्. एस्. रामानुजताताचार्यः**
प्रिन्सिपाल्
केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपति

# प्रस्तावना

श्रीशैलसूरिविरचितं दासचरितनामकं काव्यम् आदितः आन्तं यथावकाशमपश्यम् । अत्र काव्ये **प्रथमसर्गे** हरिपुर्यभिधायाः पुर्याः वर्णनं कृतम् । पाण्ड्यराजपालिता सूरिसंमता मुक्तिपुरीति सा कथिता । **द्वितीयसर्गे** विशां पाण्ड्यागमे हेतुरुदन्तः कथ्यते । **तृतीयसर्गे** तद्वंश्यानां पञ्चानां राज्ञां मुकुन्दभक्तानां वर्णनम् । **चतुर्थसर्गे** तेषां राज्ञां भक्त्या तुष्टेन भगवता कृष्णाख्यस्य प्रदानम्। तथा विशां तेषां रामानुजाख्यस्य सुतस्य प्रादुर्भावः, तस्य बाल्यावस्था, भगवद्भक्तिः इत्यादेः वर्णनम् । **पञ्चमसर्गे** रामानुजः चार्वाकादिपरसमयान् प्रविश्य तत्र गुणदोषौ विमृशतीति वर्णनम् । अथ हरिनगरीनिवासिनं श्रीनिवासं नत्वा तदनुग्रहेण आत्रेयान्वयवेंकटार्यविद्वत्करुणापात्रं भूत्वा तदुपदेशात् लक्ष्मीशशरणभजनमेव पुरुषार्थहेतुरिति रामानुजो ज्ञातवान् । तथा रामानुजाय तस्मै आत्रेयो वेंकटार्यो हरिपुरतिलकः स्वगुरोः श्रीरङ्गरामानुजस्य स्तुतिरूपाम् आचार्यस्तोत्रमालां दत्तवानिति वर्णनम् । **षष्ठे सर्गे** पूर्वप्रस्तुतश्रीरङ्गरामानुजस्तुतिरूपाम् आत्रेयवेंकटार्यप्रकाशितां गुरुसंस्तुतिं कथयति इति प्रतिज्ञापूर्वकं श्रीरङ्गरामानुजमुने-

श्चरितं वर्णयति प्रकृतकाव्यकर्ता। आत्रेयवेंकटार्यदृष्टं श्रीरङ्ग-रामानुजस्तोत्रं सकलफलप्रदमिति निगमयति ॥

**सप्तमे सर्गे** रामानुजः गुरुस्तोत्रं प्रजपन् दुरितोपरति-मभजत् । अथ कदाचिद् आचार्यं प्रणन्तुं श्रीरङ्गमवाप । आचार्यः श्रीरङ्गरामानुजः शिष्यस्वभावपरीक्षां चिकीर्षुः बहु-कालं किमपि नोपदिदेश, श्रीरङ्गात् रथमज्जनपुरीं जगाम च । अथ क्रमेण वैश्यस्य रामानुजस्य भक्त्यतिशयेन तुष्टः गुरुः 'दिव्यदेशततिसंनमनं कुरु' इत्यादिदेशेति वर्णनम् ॥

**अष्टमे सर्गे** गुरोः रङ्गरामानुजमुनेः निदेशं शिरसा वहन् रामानुजः गुरुप्रणतिपूर्वकं दक्षिणां दिशं प्रति दिव्यदेश-भगवद्भजनाय जगाम । तत्र तत्र सेतुश्रीरङ्गादिक्षेत्राणि गत्वा तत्रत्य भगवतो मङ्गलाशासनं चकारेति वर्णनम् । **नवम-सर्गेऽपि** क्षेत्राटनस्यैव वर्णनम् ॥

**दशमसर्गे** रामानुजः क्षेत्राटनं समाप्य श्रीरङ्गलक्ष्मण-मुनिं प्रणिनंसुः रथमज्जननगरं (तेरऴुन्दूर्) जगाम । आचार्यः भगवदालयसेवनेन धन्यं तं वैश्यं श्रीचक्रवर्त्यार्यद्वारा शङ्खचक्रा-ङ्कनसंस्कारेणान्वग्रहीद् इति वर्णनम् । **एकादशसर्गे** चक्रवर्ति-कृतस्य पञ्चसंस्कारस्य वर्णनं, तथा गुरुकृतोपदेशस्य वर्णनं च ॥

**द्वादशे सर्गे** श्रीरामानुजदासाय श्रीरङ्गलक्ष्मणमुनि-कृतस्य दिव्यसूरीणां (आऴ्वार्गल्) चरितस्य वर्णनम् । **त्रयोदशे सर्गे** काञ्चीमण्डले श्रीभूतपुर्यां कृतावतारस्य भगव-द्रामानुजमुनेश्चरितस्य वर्णनम् ॥

**चतुर्दशे सर्गे** वकुलमनोहरसूरिदिव्यसूक्तीनां (नम्माळ्-वार्तिरुवाय्मोळि) तात्पर्यस्य गुरुणा रामानुजदासाय उपदिदेश। तच्छ्रुत्वा दासः स्वस्य भगवत्प्रपत्तिः कार्येति गुरुं ययाचे। गुरुः भक्तिनम्रस्य तस्य देहलीशे भगवति प्रपदनं चक्रे। अथ दासभार्यायाः पतिवृत्तं ज्ञात्वा आगतायाः प्रणतायाः परीक्षणपूर्वकं तस्या अपि पञ्चसंस्कारं प्रपत्तिं चानुष्ठाय, अथ उभाभ्यामपि भागवतशेषवृत्तिः कार्येति गुरुरुपदिदेशेति वर्णनम्। **पञ्चदशे सर्गे** रामानुजकृतानां दास्यवृत्तीनां वर्णनम्। अन्ते काञ्चीपुरीं प्रति स्वगुरुणा सह गमनस्य वर्णनम्। काञ्चीपुर्यां श्रीरङ्गरामानुजमुनेः परमपदप्राप्तिवर्णनम्, रामानुजदासेन बृन्दावननिर्मापणम्, प्रतिदिनं बृन्दावनसेवनं च ॥

**षोडशे सर्गे** रामानुजदासभार्यायाः अर्चिरादिमार्गेण भगवत्प्राप्तिः, तदनु दासस्य पुनर्हरिपुरीगमनम्, तत्र प्रतिदिनं भगवद्भागवतसेवा, अन्ते दिव्यधामप्राप्तिः इत्यादिवर्णनम् ॥

एवं च काव्यमिदं वैश्यस्य रामानुजदासस्य श्रीरङ्गलक्ष्मणमुनेः शिष्यस्य भगवद्भागवतभक्तिभरितस्य चरितं वर्णयतीति स्पष्टम्। तद्व्याजेन दिव्यक्षेत्राणां तदधिष्ठातॄणामर्चाविग्रहभगवतां दिव्यसूरीणां भगवद्रामानुजमुनेः वेदान्तदेशिकस्य च प्रभावं वर्णयति। ग्रन्थकर्ता श्रीशैलसूरिः (तिरुमलाचार्यः) श्रीरङ्गलक्ष्मणमुनेः शिष्यः। निसर्गनिर्गच्छ-

त्पदावलीगुम्फितं भावुकहृदयावर्जकं भक्तिवर्धकं काव्यमेतत् । अस्य मुद्रणं सुष्ठु सम्पादनपूर्वकं श्रीमता तोपोपनामक-अनन्तनारायणमहोदयेन कृतम् । सर्वैरपि रसिकैः संस्कृतज्ञै-रास्वादनीयं काव्यमेतत् इति प्रार्थये । ग्रन्थसम्पादकः ईदृशा-त्युत्तमानां ग्रन्थानां प्रकाशनेन यशस्वी विद्वन्मान्यश्च विराज-तामिति आशासे ॥

तिरुपति
10-5-1989

N. S. **रामानुजताताचार्यः**

## कृतज्ञताञ्जलिः

ग्रन्थसम्पादनकर्मणि प्रथमतया प्रवर्तितस्य ममास्य सम्पादने सर्वदा जनितानां संशयानां उत्तरदानेन सादरमनुगृहीतवद्भ्यः न्याय-वेद-वेदान्तशास्त्रनिष्णातेभ्यः अस्माकं भूतपूर्वनिदेशकेभ्यः प्राचार्येभ्यः **डा. एस्. शङ्करनारायण**-महोदयेभ्यः सश्रद्धं सभक्त्युन्मेषं च कार्तज्ञ्यं निवेदयामि ।

अस्य सम्पादने प्रोत्साहं दत्तवतामस्माकं निदेशकानां आचार्य **डि. श्रीधरबाबु** महोदयानां तथा च '**प्रस्तावना**' लेखनद्वारा मामनुगृहीतवतां चतुश्शास्त्रादिपारङ्गतानां प्राचार्याणां **डा. एन्. एस्. रामानुजताताचार्यमहोदयानां** हार्दं कार्तज्ञ्यं निवेदयामि । ग्रन्थस्यास्य प्रकाशनाय धनं दत्वा महोपकारं कृतवद्भ्यः केन्द्रीयधनवितरणशाखाधिकारिभ्यः वारं वारं धन्यवादान् प्रकटयामि ।

अस्य ग्रन्थस्य बहिरानयनाय अत्यन्तं प्रयत्नं कृतवद्भ्यः इदानीन्तननिदेशकेभ्यः **डा. के. जे. कृष्णमूर्त्ति**महोदयेभ्यः हार्दिकं धन्यवादं व्याहरामि ।

तालपत्रप्रदाने, मुद्रितपुस्तकप्रदाने च सहकृतवतीभ्यः अस्माकं ग्रन्थालयाधिकारिणीभ्यः **डा. एस्. आर्. माता** महोदयीभ्यः तथा च सम्पादनकर्मणि अनेकशः सूचनाः दत्तवद्भ्यः सहकर्मचारिभ्यः **श्री एम्. प्रभाकरराव्** महोदयेभ्यः, अन्येषां एतद्ग्रन्थसम्पादने सहकृतवतां च कार्तज्ञ्यं व्याहरामि ।

यथाशक्ति निर्दोषं सुन्दरं च ग्रन्थमिमं मुद्राप्य पाठकानां परमोपकारं कृतवद्भ्यः 'मद्रपुरीस्थ इळङ्गो अच्चुकूडम्' मुद्राक्षरशालानिर्वाहकेभ्यः धन्यवादान् समर्पयामि ।

प्रार्थयामश्च प्रियपाठकान् काव्यमिमं पाठं पाठम् अनुभवन्तु नित्यं निरतिशयं निरवधिकमानन्दं, प्रोत्साहयन्तु च मां उत्तरोत्तरकर्मणि ॥

तिरुपति, 3–11–1989 **तोपा अनन्तनारायणः**

The present edition of DĀSACARITAM is based on a single manuscript preserved in the S. V. U. Oriental Research Institute. The description of it is as follows :

| | | |
|---|---|---|
| Acc. No. : 6531 | Material : | Palm-leaf |
| No. of leaves : 66 | Size : | 36 x 3 cm. |
| Extent : Complete | Script : | Grantha |

There is no mention of the date of copying. The scribe has made corrections in several places in margins. Therefore the present examplar is not an archetype. The leaves appear very old and written in good hand. The date of the author cannot be decided.

श्री:

श्रीशैलसूरिविरचितम्

# दासचरितम्

## प्रथमस्सर्गः

कमलाचरणद्वन्द्वचिह्नमञ्जुलवक्षसे ।
श्रेयसे जगतामस्तु महते महसे नमः ॥ १ ॥

अस्ति रम्या महाहर्म्या हरिपुर्यभिधा पुरी ।
यस्यै स्पृहयते नूनं नगर्यपि दिवौकसाम् ॥ २ ॥

परिघा यत्र राजन्ति शीतगम्भीरमञ्जुलाः ।
यद्गतां कमलां द्रष्टुमागता इव सागराः ॥ ३ ॥

पद्मरागेन्द्रनीलादिमणिमण्डलनिर्मिताः ।
जाम्बूनदमया यत्र साला भान्ति समुन्नताः ॥ ४ ॥

अनालम्बाध्वसञ्चारपरिश्रान्तो हिमद्युतिः ।
यद्वप्रमौलिमासाद्य धुनोति ग्लानिमात्मनः ॥ ५ ॥

परिघाब्धेरुपादातुमागता वारि वारिदाः ।
यदीयावरणा नूनं स्फाटिकोपलमेदुराः ॥ ६ ॥

शतमन्युमणिव्रातप्रत्युप्तनवमौक्तिका ।
यत्साल[-ा] स्पर्धते तारासन्ततेन विहायसा ॥ ७ ॥

दर्पणोदरवैमल्यदर्पधिक्कृतिधूर्वहाः ।
यत्सौधभित्तयः स्निग्धा हसन्ति विधुदीधितिम् ॥ ८ ॥

प्रासादमुग्धतादृष्टिधूतस्ववर्वासवासना: ।
ध्रुवमप्सरसोऽभूवन् यस्या हरिणलोचना: ।। ९ ।।

यत्प्रासादाग्रसम्बद्धमुक्तादीधितिसन्तति: ।
व्योम्नि जागर्ति दिव्यायास्सरितोन्यतनूरिव ।। १० ।।

यद्गोपुरतमोबिम्बदर्शनोद्यद्भयाकुल: ।
ध्रुवं द्युमणिराप्नोति रंहसास्तं महीधरम् ।। ११ ।।

गारुत्मतमहानीलपुष्पस्फाटिकनिर्मिता: ।
भान्ति यत्सदनस्थूणा: कार्मुकानीव वज्रिण: ।। १२ ।।

यस्यामगारसम्प्रोता विधुकान्ता ददत्यप: ।
प्रदीपदर्शिनीमुग्धमुखचन्द्रद्रवीकृता: ।। १३ ।।

नैकरत्नमहोबृन्दनिरस्ततिमिरा गृहा: ।
यत्र कुर्वन्ति तेजांसि त्रीणि तानि त्रपापदम् ।। १४ ।।

सुरभिर्यदगारोद्यद्गारुत्मतशिलारुच: ।
नवीनतृणधीमुग्धा चरन्त्यास्ते मुधोद्यमा ।। १५ ।।

समुन्नतानि सद्मानि यत्र दृष्ट्वारुणो विधु: ।
स्मरत: कलशीसूनोर्विन्ध्यभूधरवैरिण: ।। १६ ।।

विहारविपिनं यत्र विविधद्रुमसुन्दरम् ।
विभाति विनदद्भृङ्गकुलनि:स्वनसंकुलम् ।। १७ ।।

यदुद्यानवनीवल्लीमञ्जरीपुञ्जसौरभम् ।
पिबन्तस्तन्वते भृङ्गा नन्दन्त: स्मरसम्पदम् ।। १८ ।।

गुच्छवल्यब्जशाखाभि: कुचभ्रूवक्त्रदोर्युता ।
यद्विहारमहीभाति वनितेव विभूषिता ।। १९ ।।

अमरानर्चयन्तीव विटपैः कुसुमाधिकैः ।
प्रसारितैरिव करैर्यदाराममहीरुहाः ॥ २० ॥
यस्यामगमशाखाग्रफलान्यादाय नाकिनः ।
आस्वाद्य भूरुहं नैजं नैव कुर्वन्ति चेतसि ॥ २१ ॥
यत्सरस्तटसंरूढमहीरुहशिखान्तरे ।
निकुरुम्बाणि ताराणां कुर्वन्ति सुमनोधियम् ॥ २२ ॥
कमलोत्पलकल्हारकुमुदामोदमांसलाः ।
दीर्घिका यत्र शोभन्ते सुभगस्वादुशीतलाः ॥ २३ ॥
कमलाकान्तकारुण्यकल्लोलकुलरूपिणी ।
स्वामिपुष्करिणी यत्र वर्तते तीर्थसन्तता ॥ २४ ॥
बिम्बवल्लीसरोजेन्दुकुन्दकुण्डलिचम्पकैः ।
वेधसा निर्मितं यत्र मण्डलं हरिणीदृशाम् ॥ २५ ॥
दीर्घिका सन्निधौ युग्मं चक्रयोरिति साम्प्रतम् ।
पद्महासस्थिते चन्द्रे यद्वधूष्वेतदद्भुतम् ॥ २६ ॥
नाभिकासारनिर्याता रोमवल्लिभुजङ्गमाः ।
आरोहन्तीव वक्षोजगिरीन् यत्र मृगीदृशाम् ॥ २७ ॥
यत्रानङ्गभट[:] स्निग्धमारूढः कामिनीरथम् ।
नितम्बचक्रसंबद्धमखिलानपि बाधते ॥ २८ ॥
अद्भुतामात्मनः शक्तिं विशदीकर्तुमुद्यतः ।
ससर्ज यत्र वामाक्षीं मध्यहीनास्सरोजभूः ॥ २९ ॥
कामिनी वदनाधूतदीप्ति यत्र सरोरुहम् ।
त्यक्तुकाममिवात्मानं वर्तते सलिलान्तरे ॥ ३० ॥

सदोदयगते यत्र वधूमुखनिशाकरे ।
नाप्नोति किञ्चिदुन्मेषं कुहूपक्षकथालवः ॥ ३१ ॥

अद्भुता ललना यत्र कचे भृङ्गाः कुचे धराः ।
मुखे चन्द्राः पदे पद्मा मध्ये सिंहाश्शुका गिरि ॥ ३२ ॥

उदयन्नैकतिग्मांशुदीप्तिधूननलंपटाः ।
यत्र राजन्ति भूदेवाः परव्योम्नीव निर्जराः ॥ ३३ ॥

न्यासविद्या नृणां यत्र सूते सर्वमपीप्सितम् ।
अप्रमादामनुपमां लघुभूतां वदन्ति याम् ॥ ३४ ॥

कुंकुमागरुकस्तूरीकर्पूरहरिचन्दनैः ।
भरिता यत्र पण्यानां प्रतोल्यः सन्ति भासुराः ॥ ३५ ॥

प्रवालशंखमुक्ताभिः रथ्या यत्र निरन्तराः ।
रत्नाकरधियं पुंसां जनयन्ति महत्तराः ॥ ३६ ॥

यद्वीथीन्यस्तरत्नौघ[1]दीप्तिमालावियद्गताः ।
विचित्रकुसुमाबद्धमाल्यबुद्धिं वितन्वते ॥ ३७ ॥

पयोवहभवन्नादमानधूननदक्षिणाः ।
अभ्रंलिहपताकाभिः स्यन्दना यत्र जाग्रति ॥ ३८ ॥

इन्द्रनीलाचलान् मन्ये मत्तान् यत्र मतंगजान् ।
मदाम्बुच्छद्मना येभ्यः स्रवन्ति सरितो यतः ॥ ३९ ॥

वपुषा दानवृष्ट्या च प्रांशुत्वेन तुलां घनाः ।
न वहन्तीति तान् यत्र धिक्कुर्वन्ति मदावळाः ॥ ४० ॥

---

1. In the margin alternative reading रत्नानां is suggested.

सदागतिखगाधीशमनोजवच्चिराजितम् ।
यशो न सहते यत्र तुरङ्गमकदम्बकम् ॥ ४१ ॥

रथाहतमहीरेणुपिहितव्योममण्डलाः ।
हया यत्र न मन्यन्ते वाहं बलविरोधिनः ॥ ४२ ॥

यत्पदातिग(क) गम्भीरवीरवादससंभ्रमाः ।
स्मरन्ति रिपवो भूपाः पवमानस्य जन्मनः ॥ ४३ ॥

स्वच्छावदातगम्भीरशिशिरस्वादुकोमला ।
नाम्ना मधुमती यत्र निम्नगा सागरंगमा ॥ ४४ ॥

क्वचित्कल्हारमधुरा क्वचनाम्बुजभासुरा ।
कुत्रचित् कुमुदस्निग्धा क्वचिदुत्पलमण्डिता ॥ ४५ ॥

तटद्वयलसद्वृक्षकुसुमस्यन्दिभी रसैः ।
आम्रेडिततरङ्गौघा मधुनिष्यन्दसोदरैः ॥ ४६ ॥

शैवालकचगम्भीरा चक्राह्वयपयोधरा ।
पाठीनपद्मनेत्रास्या हरि[1]णाक्षीव मञ्जुला ॥ ४७ ॥

तटीरुहतरुस्रस्तसुमपाळिनिरन्तरैः ।
अञ्जलिं रचयन्तीव तरङ्गैस्तीरयोगिनाम् ॥ ४८ ॥

सुराधीपधनाधीशपुरवर्यौ सह स्थितेः ।
कामुकौ यद्वपुः प्राप्तौ निराकृतपुरान्तरौ ॥ ४९ ॥

यद्यशोलेखनकथादृष्टिषु प्रभवन्ति किम्? ।
सहस्रकरवक्त्राक्षा भानुभोगीन्द्रजिष्णवः ॥ ५० ॥

---

1. Originally हृषा was written and षा struck off.

पाण्ड्यभूमिपतिबाहुपालिता
स्यन्दनद्विरदवाजिरञ्जिता ।
या पुरी लसति सूरिसम्मता
मुक्तिपुर्युपनतप्रथान्विता ॥ ५१ ॥

इति दासचरित्रे प्रथमस्सर्गः ॥

श्रीमते श्रीनिवासपरब्रह्मणे नमः[1] ॥

॥ शुभमस्तु ॥

1. अस्यां मातृकायां इदं वाक्यं सर्गान्ते लिखितमस्ति । कदाचित् लेखकेनेदं लिखितमिति तर्क्यते ।

## अथ द्वितीयस्सर्गः

अथोच्यते सह्यसुतानगर्या-
विभूषणानामसमानभूम्नाम् ।
विशामनाक्लृप्तिविभूतिभाजां
पाण्ड्यागमे हेतुरुदन्तशैली ॥ १ ॥

प्रतापनिर्धूतरिपुक्षितीशः
शशास चोळो धरणीशमान्यः ।
कवेरजापत्तनमर्यकुल्यै-
रधिष्ठितं धिक्कृतजिष्णुधाम ॥ २ ॥

पाण्ड्ये नृप[ः] स्वं विषयं समृद्धं
चिकीर्षुराढ्यैर्मनुजैर्महीन्द्रम् ।
चोळं ययाचे कुलमीड्यवृत्तं
शुभंयु धर्म्यं महितं कुलेन ॥ ३ ॥

स पाण्ड्यभूपाभिमतिं (तं) वितन्व-
न्नाहूय पौरेषु तृतीयवंश्यान् ।
प्रदेयमस्मै हितमस्मदर्थं
युष्माभिरित्येव बभाण वाणीम् ॥ ४ ॥

निशम्य चोळादुदितां गिरं ते
कवेरकन्यानगरे वसन्तः ।
महीपतेस्तस्य मतं विधेय-
मिति स्म सर्वे दधिरे मनांसि ॥ ५ ॥

यद्याशयोऽयं नृपते प्रतीतः
पाण्ड्यक्षितीशप्रणयानुरोधात् ।
अशासनीयत्वमनर्गळत्वं
पाण्ड्ये न देये इति ते तमूचुः ।। ६ ।।

तदीप्सितं पाण्ड्यनृपेण चोळः
प्रदापयंस्तानखिलान् तृतीयान् ।
संप्रेषयामास समृद्धिमिच्छन्
पाण्ड्यस्य तद्बाहुधृतां धरित्रीम् ।। ७ ।।

'ऊरू तदस्य' श्रुतिसिद्धभूमा
स वैश्यवंशोऽखिलमाननीयः ।
पाण्ड्यक्षितिक्षिद्विषये न्यवात्सीत्
त्रिधा विभक्तस्सुचिरं सुखेन ।। ८ ।।

पाण्ड्यक्षितौ विश्रमपुर्यभिख्या[1]
ख्याता बभूवाप्रतिमा पुरीषु ।
कुलत्रयेष्वेकमुवास तत्र
कुलं महद्धि प्रथितं जगत्याम् ।। ९ ।।

कुलं तदेवाभवदूरुजानां
तत्रैव पुर्यां नवधा विभक्तम् ।
नवालयास्तस्य बभूवुरग्र्या
स्वस्वाधिभूदेवनिवासहेतोः ।। १० ।।

---

1. विश्रमपुरीत्यस्य 'एळयात्तं कुडि' इत्यर्थो वर्णितः ।

तेष्वालयेष्वेकमभून्महिम्ना
महत्तमं भैरवसद्मनाम्ना ।
तदाश्रितानां जननं गरीयो
निगद्यते सम्प्रति साधु तुष्टयै ॥ ११ ॥

देवाधिपो नाम यशो गरिष्ठो
बभूव कश्चिन्महनीयशीलः ।
यो भैरवीयान्वयवंशदीपो
वदान्यचूडामणितामवाप ॥ १२ ॥

उदारदानाम्बुतरङ्गपूर्णां(र्णान्)
नदान्नदीरारचयन्नुदारः ।
देवाधिनाथो विमला वितन्वन्
व्यराजताशाविपुलैर्यशोभिः ॥ १३ ॥

यदीयसद्वृत्तसुधातरङ्गान् (ङ्गाः)
निपीय लोकानमरन्द (रेन्द्र) बृन्दम् ।
कुर्वन्ति हृद्यं हरिभक्तिसिद्धयै
स भैरवं देवमभिप्रपेदे ॥ १४ ॥

पद्माक्षपादाम्बुजभक्तिवैरि
निरासधुर्यस्य स भैरवस्य ।
निर्मातुकामस्सदनं महीय-
स्समुद्यमं प्राप विकुण्ठभूमा ॥ १५ ॥

स मण्टपान्तर्गृहगोपुराद्यै-
रलङ्कृतं धामभिरद्भुतश्रि ।

विचित्ररत्नौघरुचावलीढं
गिरीशसूनोस्सदनं चकार ।। १६ ।।

स भैरवीयैरखिलैः प्रहर्षात्
विश्राणितम्माननमार्य्यदेयम् ।
तत्रालये गन्धविभूतिबिल्व-
प्रदानरूपं प्रथमं प्रपेदे ।। १७ ।।

पारम्परीतः स्वकुलोद्भवानां
समर्पितं माननमेतदग्र्यम् ।
विवेकभूम्ना त्रिदशाधिनाथ-
स्यानुग्रहं केवलमन्वमंस्त ।। १८ ।।

स भैरवं ध्यानपथे वितन्वन्[1]
विशुद्धविज्ञानविभावनीयः ।
तदीयकारुण्यधनावलोक
प्रभावतः प्राप मनोरथं स्वम् ।। १९ ।।

स सम्यगुद्बुद्धपरात्मतत्त्व-
स्समाधियोग्यं भुवनं प्रपश्यन् ।
समाजगामाम्बुजनाभहृद्यां
हरेः पुरीं मुक्तिपुरीसगभ्र्याम् ।। २० ।।

आराधयन् पूर्तगणेन चेत-
स्सरोजनाभस्य सुराधिनाथः ।

1. Intended for भैरवध्यानपथं वितन्वन्

चतुर्दश स्वादुजलांस्तटाकान्
चखान कल्हारपयोजमुग्धान् ।। २१ ।।

अबन्धि सत्या सरसी सुतीर्था
व्यधायि सत्याचलसालभित्तिः ।
समीहमानेन समाधिवृद्धिं
सुजातभावेन सुराधिपेन ।। २२ ।।

स तैलधारोपमवासुदेव-
पदाम्बुजप्रेमरसैकभूमिः ।
चक्रे न चित्ते क्षणभङ्गुराणि
सुखानि देवान्तरसम्भवानि ।। २३ ।।

विचारशौण्डो मनुजो निकामं
विद्योतमाने सविधे सुधाब्धौ ।
तं सम्परित्यज्य पयोभिलाषी
भजेत किं घोषभुवं विदेश्याम् ।। २४ ।।

धर्मानुबन्धीनि सुखानि गृह्ण-
न्ननुद्यमादापतितानि धन्यः ।
त्यजन्न धर्मप्रभवानि तानि
वृत्तिं भजन्नाजगरीं न्यवात्सीत् ।। २५ ।।

तद्वंशजातान्निजदासभावे
निधातुकामेन गदाधरेण ।
पश्चात्मजा भद्रगुणैकताना
विश्राणिता नाकसदीश्वराय ।। २६ ।।

अमर्त्यनाथस्तनयं तृतीयं
स रामसंज्ञं विततान विज्ञम् ।
जिगाय तातं स गुणैरुदारो
दिगन्तविश्रान्तयशो वितानः ॥ २७ ॥

स चारविन्दाक्षनिविष्टभाव-
स्तदर्हणालाभकृतार्थचेताः ।
अमन्यतात्मानमतीव धन्यं
निस्वो यथा शेवधिनागतेन ॥ २८ ॥

स्थाने तदेतद्यदसौ विहाय
सुरान्तरं श्रीपतिमेव भेजे ।
भजेत को भास्वति गांगतोये
सकर्दमं पल्ल(ल्व)लवारि पूतम् ॥ २९ ॥

वियत्तटिन्यां सितपङ्कजत्वं
दिशामृगाक्षीवदने स्मितत्वम् ।
यशोम्बरे तस्य निशाकरत्वं
वहत्यहीन्द्रायतने फणित्वम् ॥ ३० ॥

तस्यात्मभूश्शङ्कर इत्यभिख्यां
वहन्महन्मण्डललालनीयः ।
आसीदुदारं यमुदाहरन्ती
तृतीयवंशाम्बुनिधेर्मणीन्द्रम् ॥ ३१ ॥

गायन्त्यमर्यः किल यस्य गाथा
लक्ष्मीशसंप्रीणनधर्मगर्भाः ।

स पद्मनाभाङ्घ्रिसरोजयुग्मे
दधार चेतो न परानमंस्त ॥ ३२ ॥

स रम्यजामातृपदाभिधेयं
सतां विधेयं समवाप सूनुम् ।
वंशस्तृतीयः प्रथमेन येन
सुकीर्तिधाम्ना प्रथमो बभूव ॥ ३३ ॥

परं धनं यस्य सरोरुहाक्ष-
स्तदन्तरंगाश्च स एव यस्य ।
पितृत्वमाप्नोति वयस्यभावं
शरण्यतां बन्धुसगर्भताञ्च ॥ ३४ ॥

महत्समाजावगताखिलार्थ-
स्सविद्युदम्बोधरदर्पहन्तुः ।
मुरद्विषो जन्म गुणाभिधाभि-
स्संभाविताभिर्दिवसान्निनाय ॥ ३५ ॥

यदीयविश्राणनभूमधूता
न साम्प्रतं वैरिपुरस्थितिर्नः ।
इतीव सन्ति त्रिदिवे वदान्या
श्रुतप्रभावा मणिधेनुवृक्षाः ॥ ३६ ॥

स विश्वविख्यातविसीमकीर्तिं
विभावयन् वासभुवं प्रशस्ताम् ।
रमानिवासालयतामुपेतां
प्रापत्पुरीं तां हरिपुर्यभिख्याम् ॥ ३७ ॥

आद्योऽभवत्तस्य सुता (तो) सुकीर्ति-
नाम्ना कुमारः परिभूतमारः ।
उदारचारो मधुहृद्विहारो
मरन्दपूरोपमवाक्प्रचारः ।। ३८ ।।

कालेन काञ्चित् कमनीयरूपां
कलामिवेन्दोः कमनस्पृहाढ्याम् ।
कन्यां कुमारः कलयाञ्चकार
स्वदारभावावहभावबद्धाम् ।। ३९ ।।

भवाभितप्तानवितुम्मुरारि-
र्भवापहन्त्री विरजां व्यधत्त ।
यद्रूपतः पुष्करिणीवरां तां
बबद्ध (न्ध) स स्वामिसरस्समाख्याम् ।।४०।।

यदुद्भवं विश्वमनोऽनुकूलं
यशः कदम्बं धवळं सितांशुः ।
विलोक्य सोद्वेगमनास्समस्ति
बिभर्ति चित्तेन ततो मलत्वम् ।। ४१ ।।

सरोजबन्धोस्तनुजो यदीयं
निशम्य विश्राणनतत्परत्वम् ।
न साम्प्रतं चेतनता ममेति
ध्रुवं स भेजे बत कर्णभावम् ।। ४२ ।।

तस्याभवत्पञ्चकमात्मजानां
दिगान्तविश्रान्तयशस्ततीनाम् ।

ऊरव्यसन्तानशिखामणीनां
त्रिधामसेवारतमानसानाम् ॥ ४३ ॥

तनूभवेष्वेषु सुशीलशोभी
रामोऽभिधानेन यशः पयोधिः ।
अभूदनूनः कृपया मुरारेः
काकोदरोर्वीधरशेखरस्य ॥ ४४ ॥

संख्यावदाभासपुरा[1]भिमानी
भक्ताग्रणीः कश्चन वैश्यवंश्यः ।
अभूत्तदीयां करुणां विचिन्वन्
तद्वासगेहं स जगाम रामः ॥ ४५ ॥

ध्यात्वे नमस्कृत्य स रामभद्रो
व्यजिज्ञपत् वाञ्छितमात्मनीनम् ।
दयेत सिंहाद्रिमणिर्यथा मे
तथा विधेया करुणा मयीति ॥ ४६ ॥

निशम्य रामस्य वचांसि भक्तो
दिनेषु सौरेरिह पद्मनाभः ।
आगत्य भक्तिप्रचुरेण सेव्य-
स्त्वयोरुजन्मन्निति राममूचे ॥ ४७ ॥

तथेति रामः कृतिवासपुर्यां
नित्योदितं भक्तकृतेऽम्बुजाक्षम् ।

---

1. संख्यावदाभासपुर इत्यस्य 'पुलवन् कुडि' इत्यर्थो वर्णितः [illegible]

विभ्राजमानं वृषशैलधुर्यं
नमन्नजस्रं हृदि तं वितेने ॥ ४८ ॥

ध्यायन् मुकुन्दं प्रतिसौरवारं
व्रजन्नसावन्यपरः कदाचित् ।
घोरं महद्भूतमपश्यदग्रे
रुन्धानमात्मानमभूच्च भीतः ॥ ४९ ॥

एवं सतस्तस्य भयापनुत्तिं
व्यधत्त भूतापनयेन देवः ।
स्थाने तदेतत् कमलानिवास-
स्सहेत वा स्वानतखेदगन्धम् ॥ ५० ॥

स भक्तनिघ्नं कृतिवासदेवं
नमन्नताग्र्येण निदेशपूर्वम् ।
त्यक्तः स्वपुर्यां कलयन् सपर्यां
मधुद्विषो नित्यमुवास धन्यः ॥ ५१ ॥

पञ्चस्वद्भुतशीलशालिषु सुतेष्वेकोऽभवन्नामत-
श्शास्ता यन्मुखतस्ततान कमलाकान्तःस्वकीयं यशः ।
विश्वव्यापि यदन्वये समभवन् पद्माक्षपादाम्बुज-
प्रेमोत्कर्षविवर्धमानपुलका विश्वाधिकास्सूरयः ॥ ५२ ॥

इति दासचरित्रे द्वितीयस्सर्गः ॥
श्रीमते श्रीनिवासपरब्रह्मणे नमः ॥
श्रीमते कृष्णाय महते परमात्मने नमः[1] ॥

---

1. पूर्ववद् अत्रापि लेखकेनेदं वाक्यं लिखितमिति मन्ये ।

## अथ तृतीयस्सर्गः

अनूद्भवं पञ्चसु तेषु सेवकं
समीक्ष्य तेजो विजितांशुमालिनम् ।
पयोधिजानाथपदाब्जकामुकं
यथार्थसज्ञं भुवि सूरयो विदुः ।। १ ।।

स सेवको बालिशभावगूहितः
पुरा समुद्भूतसमाधिवैभवः ।
प्रपञ्चशैलीं मनसानुचिन्तयन्
किशोरवृत्तिं कलयन्नवर्तत ।। २ ।।

क्रमेण कालेषु गतेषु केषुचित्
गृहस्थतामाकलयन्नसौ वशी ।
समानशीलामभिजातवंशजां
अनीनयत् कामपि पाणिसङ्ग्रहम् ।। ३ ।।

स पुण्डरीकाक्षपदाम्बुजस्मृति-
प्रभावनिर्धूतसमस्तकिल्बिषः ।
निरन्तरान्तस्सुखवीचिवारिधि-
र्न वेद किञ्चिद्बहिरुद्भवाम्मुदम् ।। ४ ।।

निवृत्तबाह्येन्द्रियबाहु(ह्य)वृत्ते-
स्सुयोगिनस्तस्य भुजे च मूर्धनि ।
बबन्ध नीडानि कुलं पतत्रिणां
पदान्तिके चेरुरपि स्फटाभृतः ।। ५ ।।

तपस्यतस्तस्य दुरासदद्युते-
रमन्दसम्मोदझरीविहारिणः ।
न चन्द्रमन्दानिलभानुवारिदै-
र्बभूवतुश्शर्म शुचौ महात्मनः ॥ ६ ॥

समाधिमानन्दघनं गतोपमं
सुनिर्मलं तस्य निजान्वयोज्ज्वलम् ।
विलोक्य साक्षात् कृतितौल्यधूर्वहं
श्रियःपतिस्तत्र दयाझरीं व्यधात् ॥ ७ ॥

अथाच्युतः पारिषदैः समावृतः
श्रिया च देव्या क्षमयोपलालितः ।
उपासकस्याविरभूत्तपोवने
निजानुरक्तानुचरो हि माधवः ॥ ८ ॥

स दिव्यमत्यद्भुतभूषणोज्ज्वलं
निरस्ततिग्मांशुशतं स्वरोचिषा ।
निरन्तरं चेतसि भावयन्विभुं
बहिस्तथाभूतमपश्यदानतः ॥ ९ ॥

मुहुर्मुहुस्तत्प्रणमन्महन्महो
विधूतवर्षार्बुदकोटिदीधिति ।
ननर्त पस्पर्श जहर्ष संजगे
ददर्श चास्तौदवदन्मुमोह च ॥ १० ॥

तमीदृशं वीक्ष्य विभुर्दयानिधि-
र्विरोचमानं निरवद्यया मुदा ।

प्रदातुकामः पुनरुद्भवापहं
पदं वचः प्राह निहीनमाक्षिकम् ।। ११ ।।

उपासकाधीश्वर तावकं तपो
मुदं मनः प्रापयति स्वनुष्ठितम् ।
वरप्रदातारमवेहि साधु मा-
ममोघतामेति हि मामिका कृपा ।। १२ ।।

स चैवमुक्तश्शतपत्रचक्षुषा
विनश्वरं वीक्ष्य पदं दिवौकसाम् ।
अयाचतार्यां धिषणामनुत्तमं
सुधाशनानामपि दुर्लभं पदम् ।। १३ ।।

पराशयज्ञानपरार्तिहारिता
रमानिवासानतदासतामुखान् ।
वरानमोघानरविन्दलोचनं
स भक्तिसिन्धुर्वरयाञ्चकार च ।। १४ ।।

नतार्तिहारी वरदो मनोरथा-
नदादुदारोऽर्यकुलावनीभृते ।
अमन्यतात्मानमुदारतापदं
न तावतासावरविन्दलोचनः ।। १५ ।।

बभाण चैनं तव सन्ततौ नरा
मदीयपादाम्बुजभक्तिमेदुराः ।
कुलोपपन्ना चरणाधनाधिका
भवेयुरद्धेति रमानिकेतनः ।। १६ ।।

स नैकभानूदयसंप्रसृग्वी-
प्रभावलीसंभ्रमदायिदीधितौ ।
तिरोहिते सत्यरविन्दलोचने
बहिर्न किञ्चित्समपद्यतोरुजः ॥ १७ ॥

ततः कृते सद्मनि रत्नसंचयै-
र्निवेशयन्नर्च्यमसीमदीधितिम् ।
मुदा समानर्च मणिप्रभोज्ज्वलं
स सेवक[:*] श्रीधरपादुकायुगम् ॥ १८ ॥

अनन्यसाधारणभूमभासुरो
मनोरथान् योगबलेन सेवकः ।
ददन्नतेभ्यो न्यवसत्पुरीवरे
हरेःपुरे सूरिसमृद्धिकल्पके ॥ १९ ॥

कदाचिदेवं वसतो महात्मनो
दुरन्तभूम्नोऽस्य विभावदूरधीः ।
लघुर्नरः कश्चन तस्य सन्निधौ
चकार कर्माप्रियमुद्धताशयः ॥ २० ॥

निवारितोऽप्यप्रियकर्मतोऽखिलैः
स्वदेवतानुग्रहदर्पमोहितः ।
उपारराभैव न वारणार्हता
परेण मेनेऽतिधि या खलाग्रणीः ॥ २१ ॥

विसर्जनीयो हि खलो जनस्सता
यथाङ्गुली कुण्डलिदंशदूषिता ।

इति स्वयं खिन्नमनास्तदन्तिकं
त्यजन्नयं माधवमाप चेतसा ॥ २२ ॥

स शान्तरूपं समवेक्ष्य सेवकं
कषायिताक्षोऽतिरुषा शपन् बहु ।
स्वदेवतामादरतस्तुवन्नम-
न्नयाचत स्वस्य रिपोर्निराकृतिम् ॥ २३ ॥

अजानती सापि सरोजचक्षुषो
विघातदूरं महिमानमुद्यता ।
स भक्तवैरिप्रतिघातकारिणी
द्रुतं प्रदुद्राव करालदर्शना ॥ २४ ॥

चतुर्मुखाद्या अपि सर्ववेदिनो
विदुर्न लेशेन यदीयवैभवम् ।
निरंकुशं तादृशमल्पचेतना
विवेदनेत्यत्र न किञ्चिदद्भुतम् ॥ २५ ॥

गता समीपं कमलेशसेविन[ः*]
स्वरोचिरुद्धूतदिनेशशुष्मणः ।
तदीयतेजोभिभवेन विह्वला
बभूव सा वासरदीपसोदरी ॥ २६ ॥

पराहता तेन मुकुन्दजीविना
लघीयसी सा कुपिता निजाननम् ।
कदर्थयन्तीदमुवाच भीषणा
कदर्यजन्तोर्न हि किञ्चिदक्षमम् ॥ २७ ॥

न हि त्वया मुग्ध विमर्शपूर्वकं
समुद्यमोऽकारि निवारणे रिपोः ।
न हि प्रदीपोपशमाय कल्पते
लघुः पतङ्गः स्वयमेव शाम्यति ॥ २८ ॥

अमुष्य कालानलदाहितेजसः
पयोधिजाकान्तनिषक्तचेतसः ।
समीपपृथ्वीमपि नेक्षितुं क्षमा
बभूव दग्धा च तदीयतेजसा ॥ २९ ॥

मयोद्यमो हिंसनहेतुरादृत-
स्त्वदीयवाणीदृढलग्नचित्तया ।
स चाप्यमोघो निजकर्म नाचरन्
भजेत नैवोपरतिं शुभेतरः ॥ ३० ॥

अतस्त्वदीयं तनयं क्षणादहं
करोमि कीनाशनिकेतनातिथिम् ।
इति ब्रुवन्त्यर्भकमानतेप्सितं
क्षणेन चक्रे रुधिरोद्गिरन्मुखम् ॥ ३१ ॥

तदा स नैजां परिचिन्त्य देवतां
नितान्तलघ्वीं परमो रमापतिः ।
गतिस्तदीयाश्च तथेति निर्णयं
भजन्नुपागात् स्वसुतेन सेवकम् ॥ ३२ ॥

स चानमन्तं सतनूजमागतं
विनीलवक्त्रं विलपन्तमार्तितः ।

उदीक्ष्य बाले तुलसीजलं क्षिपन्
उवाच नेतः परमस्य भीरिति ।। ३३ ।।

प्रदत्तमात्रे सलिले मधुद्विषः
पदाब्जसङ्गिन्युपमातिशायिनि ।
विधूतदोषः परिभूतदैवतः
किशोरकोऽजायत तेजसाधिकः ।। ३४ ।।

स्वमात्मजं वीक्ष्य गतव्यथं मुदा
नमन् स देवान्तरसंश्रितोऽप्यमुम् ।
तृतीयमादेशपुरस्सरं ययौ
निकेतनं भागवतप्रभावितम् ।। ३५ ।।

अथैकदा पन्नगभूधराधिपः
प्रकाशयन् विश्वपुमर्थदायिताम् ।
स्वसेविनं कंच[न•] भूसुधाशनं
विवाहदत्तादरमाह सस्मितम् ।। ३६ ।।

पुरं महीयो हरिपत्तनाह्वयं
समुज्ज्वलं[1] कुम्भभुवोर्मुनेर्दिशि ।
प्रकाशते तत्र मदेकजीवितो
नतोऽस्ति कश्चिन्महनीयवैभवः ।। ३७ ।।

स ते महीदेव मनोरथप्रदो
भवानितो गच्छतु सेवकान्तिकम् ।

---

1. समुद्भवं

भवत्कृते स्वप्नदशासु सादरं
स बोधितो नात्र तवास्तु संशयः ॥ ३८ ॥

इतीरित[ः*] श्रीनिधिना महीसुरः
क्षणेन तीर्त्वा विषयान् बहून् पथि ।
उपाजगामामरबृन्दवन्दितां
पुरं हरेस्सेवकभक्तसेविताम् ॥ ३९ ॥

प्रतीक्षमाणोऽग्रभवं मधुद्विषा
निवेदितार्थो हरिभक्तजीवितः ।
स सेवकोऽपश्यदमन्दवैभवं
महीसुरं भानुसहस्रसोदरम् ॥ ४० ॥

जगाद भूदेवमहो ममाधुना
समीहितं सर्वमवाप सार्थताम् ।
जनिर्मदीया सफला यतो भवं(वान्)
रमानिवासाश्रितचक्षुरीक्षितः ॥ ४१ ॥

घुसन्महीन्द्रादिममौळिमानितं
रजोऽभवत् पादपयोजसंगतम् ।
अनेकजन्माहितपुण्यभूमत-
श्शिरो मदीयं वितनोति[1] मण्डितम् ॥४२॥

भवन्मतं सिद्धयति शौरितेजसा
महीसुरेन्द्रेति स वाचमीरयन् ।

1. वितताम

धनाधिपाशास्यधनं व्यधाद्द्विजं
निरंकुशा शौरिकृपा हि साधुषु ॥ ४३ ॥

अथेर्ष्यया काचन तिग्ममानसा
वधूर्नयन्ती रुशतीं नमन्मणिम् ।
प्रसूतिमासेऽपि च तेन मन्तुना
न जन्मसूनोस्समपद्यताद्भुतम् ॥ ४४ ॥

न गर्भिणी वै जननेऽपि मानिनी
प्रसूतिमाप्नोति किमेतदद्भुतम् ।
उतापराधेन मुरारिसन्नते
किमुस्विदम्भोनिधिनन्दिनीपतौ ॥ ४५ ॥

यदादिभक्तागसि सा धृतादरा
तदा प्रभृत्येतदुपागतं फलम् ।
अतस्तदीयाशयतोषणं पुनः
प्रतिक्रियास्येति मतिं बुधा दधुः ॥ ४६ ॥

महर्निदेशादथ गर्भिणी मुहुः
प्रणम्य भक्तं तदनुग्रहात्सुतम् ।
प्रसूतवत्यद्भुतरोचिरुज्ज्वलं
प्रसादनान्तो हि महद्व्यतिक्रमः ॥ ४७ ॥

स कैटभारातिकटाक्षवैभव-
प्रकाशबुद्धाखिलचेतनाशयः ।
अभीप्सितं तत्तदुदारशेखरः
प्रजाधनारोग्यमुखं ददौ नृणाम् ॥ ४८ ॥

अनन्तनानागरळोद्भवां रुजं
मुरारिपादोदकसंप्रदानतः ।
शमन्नयन्नूरुजवंशपुंगव[:*]
स्वकीर्तनेनाऽपि बभौ नताग्रणीः ॥ ४९ ॥

मुरारिवीक्षारसबद्धमानसा-
स्तदीयवंश्या अधुनापि मानवाः ।
सहामयाश्चेदपि नान्यदौषधं
वितन्वते शौरिपदाम्बुना विना ॥ ५० ॥

वन्ध्यास्सिद्धतनूभवा धनवतामग्रेसरा दुर्गता
मूका वाग्मिधुरन्धरा[:*] श्रुतिहता बाधिर्यवार्तातिगाः ।
पादाता अपि पङ्गवो गतधियो वागीशता भासुरा[:*]
श्रीमत्सिंहमहीधरेन्द्रकरुणा सान्द्रे जने जाग्रति ॥ ५१ ॥

इति दासचरित्रे तृतीयस्सर्गः ॥

## अथ चतुर्थस्सर्गः

अथ सहोदररामम‌तानुगो
मधुविरोधिपदाम्बुजषट्पदः ।
स कलयन् हृदि फल्गुसुरान्तरं
शुभमुवाच वचस्सुहृदां कुलम् ।। १ ।।

श्रुतिविदो निगदन्ति सुरान्तरं
बहुभवार्जितकर्मफलान्वयि ।
अशुभमानमदल्पफलावहं
स्वमतनिर्वहणेऽन्यनिरीक्षणम् ।। २ ।।

भवनिबद्धपशुव्रजमोचन-
प्रभुरसौ ननु नीरजलोचनः ।
प्रभवतीषदपीतरदैवतं
भवभृतो न हि मोचयितुं भवात् ।। ३ ।।

ननु सहस्रमरीचिसहस्रकं
न खलु चित्रगतं रविधीवहम् ।
प्रतिरुणद्धि निशीथसमुद्भवं
निखिलबोधविरोधितमोघनम् ।। ४ ।।

पदजवोदितमारुतपातित-
क्षितिधरं विनतातपसां फलम् ।
खगपतिं खगमोऽपि बलिप्रियः
किमनुसर्तुमपि क्षमते क्षणम् ।। ५ ।।

न पथिकं तृषितं खरदीधिति-
प्रभवतापनितान्तपराहतम् ।
गतशुचं कलयेन्मृगतृष्णिका
लघुमनीषजलाभ्रमदायिनी ॥ ६ ॥

तदधुना न भवद्भिरनुष्ठितं
शिवतमं लघुदैवतसंश्रितैः ।
सदहितं विनिवर्त्य तमुद्यमं
भजत दैवतमम्बुजलोचनम् ॥ ७ ॥

सहजसेवकरामसमीरिता-
मिह परत्र च भव्यकरीं गिरम् ।
इति निशम्य सुहृत्कुलमादरा-
न्निखिलशेषिणमाप रमापतिम् ॥ ८ ॥

गजमुखानुजसूनुषु पञ्चसु
प्रथितकीर्तिषु भासुरभक्तिषु ।
असदृशं करुणां कमलापति-
र्व्यतनुतानतबृन्दशुभङ्करः ॥ ९ ॥

वृषमहीधरशृङ्गविहारिणः
पृथगिमे महदालयपञ्चकम् ।
ससृजुरद्भुतरत्नमहो घनं
हृदयहारितमः कुलकुट्टनम् ॥ १० ॥

मणिगृहे विनिधाय पयोधिजा
कमनपादुकयोर्युगळं मुहुः ।

अनलसूनुतनूभवपञ्चकं
परिचचार महादरमेदुरम् ।। ११ ।।

परिचरत्स्वपि तेषु रमानिधि
व्यधित शास्त्रपदार्थपदं कृती ।
अनुदिनं घृतदीपसमर्पणं
कमललोचनमानसतोषणम्[1] ।। १२ ।।

समवलोक्य हरिर्विमलं मनो
धुतसुरावलि शास्तुरनुत्तमम् ।
करुणयाकुलया तनयं ददौ
निगदितस्स च कृष्णसमाख्यया ।। १३ ।।

स महिळां महितान्वयसम्भवां
सदृशशीलवयोगुणमण्डिताम् ।
अकलयत् करसंग्रहकर्मणा
स्वदयितां समये शुभदायिनी[म्*] ।।१४।।

समुदभूत्तनयत्रितयं पुरा
यदुभवस्य तृतीयशिखामणेः ।
तदपि केसरिभूधरभूभुजा
समभवद्विधृतं महितं गुणैः ।। १५ ।।

तदनु गर्भमुवाह रुचाधिकं
भवितृभागवतावलिमण्डनम् ।

---

1. तर्पणम्

निजपुरातनपुण्यविपाकतो
यदुतनूभववारिजलोचना ॥ १६ ॥

समुदयो विदुषामवलोक्य तां
स्वरुचिधूतसमस्ततमस्ततिम् ।
उदयदिन्दुसहस्रसमानना-
मभजतातुलमोदसरिज्झरीम् ॥ १७ ॥

अवददेवमियं कुलकीर्तिदं
शुभगुणौघविहारसुखालयम् ।
वृषमहीधरधूर्यदयापदं
शुभपदं तनयं जनयिष्यति ॥ १८ ॥

न धियमुद्वहति स्म फलोदना-
मृतदधिप्रमुखेष्वपि साबला ।
तमनुसर्तुमिवात्मजमात्मनः
परिहृतान्यसुखं भुवि भाविनम् ॥ १९ ॥

कतिपयेषु दिनेषु गतेषु सा
धवलिमानममन्दतरं दधौ ।
उदरभासुरबालिशमानस-
प्रसृमरामलसत्वमतिप्रदम् ॥ २० ॥

स्वशिशुना जठरान्तरचारिणा
हृदपदो निहतश्चरमो गुणः ।
निवसति स्म तदीयकुचद्वयी
[सु*]मलिमोपधिना हरिणीदृशि ॥ २१ ॥

तनुभवः कनकाद्रिषु लोष्ठता
धियमुपाहरतीति धियै नृणाम् ।
विमतिमाभरणेऽपि हिरण्मये
समभजाम(जन्म?) हिला मणिमेदुरे ॥२२॥

स्वसहचारिणि कुक्षितले महन्-
महितगर्भधरत्वकृतं यशः ।
इति मुदेव बभूव मृगीदृश-
स्तनुतरं पृथुमध्यमभूत्तदा ॥ २३ ॥

न हि विधास्यति तत्तनयः पदं
सुहृदयः प्रकृताविति भूसदाम् ।
प्रथयितुं किल गर्भभरालसा
कतिचिदेव पदानि ततान सा ॥ २४ ॥

बकुळपुष्पकदम्बकविष्फुर-
द्रसविलोलमधुव्रतझंकृतैः ।
ऋतुरभूत् प्रथमो ललितस्तदा
महिधुरन्धरमोदरसावहः ॥ २५ ॥

स(श)रधिभूशरदि प्र(क्प्र)थिते कलौ
सति मधौ मधुवैरिमनोहरे ।
उडुनि तत्र भुजङ्गमदैवते
जनयति स्म सुतं यदुभूवधूः ॥ २६ ॥

सुलखितानि मुखानि[1] विधास्यति
स्फुटमयं मधुरैर्यशसाम्बरैः ।

1. read better सुखानि

इति तदोपकृतिस्मरणादिव
प्रसदनं प्रचुरं हरितो ययुः ।। २७ ।।

अलससञ्चरणौ मरुदाववौ
सुरभिळो मलयाद्रिसरस्सुमैः ।
अवलुलोकयिषुः किल तं तदा
कमललोचनदासशिखामणिम् ।। २८ ।।

द्विजगणेन मखालिभिरात्मनो
मुदमसौ जनयिष्यति बालिशः ।
इति कृशानुरुदारशिखस्तदा
निरुपमां समपद्यत दीधितिम् ।। २९ ।।

विशदकान्तिरसावन[व*]द्यता
विहृतिभूरिति तत्तुलनेच्छया ।
समभवन्निखिलान्यपि तत्क्षणं
गृहकुलान्यनघानि रुचां पदम् ।। ३० ।।

उपनिशम्य शुभप्रसवां वधू-
मतुलमोदपयोधिनिमग्नधीः ।
यदुविधुः प्रददौ शुभशंसिने
स्रजमुदारमणिर्मणिमञ्जुलाम् ।। ३१ ।।

अथ तमद्भुतमुत्तमसत्तमं
तनुभवं प्रति यादवनन्दनः ।
विरचयन् भवुकं कनकादिमै-
रकलयन्मुदितानवनीसुरान् ।। ३२ ।।

अनुकरिष्यति लक्ष्मणमर्भक-
स्तदवतारमहोडुसमन्वयात् ।
इति धियेव चकार समाख्यया
रघुसुतानुभवमात्मभवं पिता ।। ३३ ।।

अनुदिनं ववृधे स च लीलया
कथयति स्म वचांसि च कानिचित् ।
हरिमुरारिमुखानि सुहृद्वृते
पितरि शृण्वति वागमृतादरे ।। ३४ ।।

जगति बालकुलं कथयत्यहो
जनकमातृसहोदरवाचकम् ।
पदमसौ न तथेति सविस्मयं
ददृशुरेनममन्दमुदो जनाः ।। ३५ ।।

त्रिचतुरासु गतासु शरत्स्वसौ
विहृतकामनयास्वसुहृत् वृ(द्वृ)तः ।
मुरहरप्रतिमामतुलादरं
कुसुमनन्दमुखैस्समपूजयत् ।। ३६ ।।

रघुभवावरजस्य च पञ्चमे
वयसि पाठयितुं प्रहितोऽन्वहम् ।
परिपपाठ कलां कलशीभुवो
निखिलसूरिपरिग्रहमानिताम् ।। ३७ ।।

पठनमात्रकृतादरणाः कला
रघुभवावरजं समुपागताः ।

मधुरमञ्जुलनिर्मलशीतला
वितंतयस्सरिदामिव वारिधिम् ॥ ३८ ॥

विदितविश्वकलो यदुभृत्सुत[:*]-
स्वकुलयुक्तविधानवशंवदः ।
अवसदारचयन्महतां मुदं
शमनिधिर्मतिदूर इवार्भकः ॥ ३९ ॥

रचयतात् गृहधर्ममनुत्तमं
तनुभवो मधुवैरि मुदे परम् ।
इति हि तज्जनकः कुलजातया
महिळयाऽकृत तं गृहिधूर्वहम् ॥ ४० ॥

गृहसदामुचितं विदधद्विधिं
कमललोचनपादसरोजयोः ।
सुरसमर्पणमेव परं धनं
स कलयन् वितताने तथान्वहम् ॥ ४१ ॥

मधुनिषूदनवीक्षणभाजनं
स तु विमर्शबलेन मृगीदृशाम् ।
वपुरुदैक्षत धातुभिराततं
युगळयोनिभवं मलदूषितम् ॥ ४२ ॥

अमृतसाधनसादरमानस-
स्मरणदूरसुरवान्तरसौरभः ।
स मनुजान् विषयानुभवाशया-
नमनुतानघभाग्यविनाकृतान् ॥ ४३ ॥

अहनि यत्र मुकुन्दपदार्चनं
न घटते कुसुमैर्जलजादिभिः ।
तदुपवस्तदिनं विधृतात्मनो
मुरहृता रघुसिंहकनीयसः ॥ ४४ ॥

मलयमारुतचन्दननीतित-
स्स समुदैक्षत भागवतावलिम् ।
जलजलोचनजीवितसम्मतां
तदितराननलोरगसन्निभाम् ॥ ४५ ॥

तृणतृणादनलोष्टपतत्रिणां
भवभृतामपि मानवजन्मनाम् ।
अमनुतैषदपि स्वयमन्तरं
रघुभवावरजो न विवेकतः ॥ ४६ ॥

अथ कदाचिदुदारयशोनिधि-
स्स विधिवैभवतो भववारिधिम् ।
परिजिहीर्षुरनादरणं दधौ
सदनदारधनादिषु वस्तुषु ॥ ४७ ॥

न हि विमुक्तिरुपाह्रियते सता
भवपथेऽपि सतो(ते)ऽतिमतिं दधत् ।
रघुभवावरजः प्रथमस्सतां
स निरयान्निरयादिव सभ्रतः ॥ ४८ ॥

हरिपुरीकमलानिलयं पुरा
स विनमन्निजरक्षणदीक्षितम् ।

तदनुगोष्ट्यभिधानपुरीमणिं
प्रणतिकर्म विधातुमना ययौ ।। ४९ ।

कमलकोमललोचनभासुरं
दरसुदर्शनमुग्धकराम्बुजम् ।
दिनकरायुतधूननदीधितिं
मधुरिपुं प्रणनाम स लक्ष्मणः ।। ५० ।।

अनुदिनमनिमेषैर्लोचनैस्सेवमान-
श्चरणकमलयुग्मं सौम्यनारायणीयम् ।
धृतनिरतिशयमोदो लक्ष्मणः स्वं कृतार्थं
व्यतनुत हरिभाजां नान्यतश्चारितार्थ्यम् ।।

इति दासचरित्रे चतुर्थस्सर्गः ।।

।। शुभमस्तु[1] ।।

1. पूर्ववदत्रापि लेखकेनेदं लिखितमिति तर्क्यते ।

## अथ पञ्चमस्सर्गः

सौमित्रिः परमतभावबोधलोलः
श्रीरामानुजमुनिदर्शनादरोऽपि ।
भूसारावतरणदिव्यसूरिनीत्या
राद्धान्तानपरविनिर्मितान्विवेश ॥ १ ॥

अद्राक्षीत्परसमयान्यया स पूर्वं
शैली सा गुरुसमयानुवादपूर्वम् ।
प्राज्ञानामिह समुदीर्यते निदेशात्
प्राचीनैरवगतया महापदव्या ॥ २ ॥

प्रत्यक्षं मितिकरणं भवेदमुष्य
प्रामाण्यं न भवति दोषशालितायाम् ।
मानत्वं न वहति हेतुधीर्मतेऽस्मिन्
शब्दोऽपि स्वयमयतेऽनुमानतौल्यम् ॥ ३ ॥

नैकाभिर्गुरुरुपपत्तिभिः प्रमाणं
प्रत्यक्षं सममनुतान्यमानहानात् ।
स्थाने तद्वचसि फलोपधानदूरे
किञ्चिन्न प्रयतनमश्नुते जडोऽपि ॥ ४ ॥

सौहार्दान्मनसिजनीतिचौर्यतन्त्रै-
रर्थेहादिभिरपि शाब्दवस्त्वयोगात् ।
हृद्यत्वादवनिसदां नृणां प्रतीत-
स्सिद्धान्तो जयति बृहस्पतिप्रणीतः ॥ ५ ॥

शारीरक्लमदधनव्ययादिसाध्यः
क्षोदिष्ठालघुतमधर्मपाशबद्धः
निर्णीत[:*] स्वजठरपूर्तये कुदृग्भी
राद्धान्तो न हितपरेण माननीयः ॥ ६ ॥

भिन्नस्याद्यदि जननान्तरावलीढः
क्षेत्रज्ञो बहुलकुलात्मकाच्छरीरात् ।
सन्न्यासो दुरितचयात्तदा विधेयः
कीनाशादपि धृतपाशकुन्तशक्तेः ॥ ७ ॥

तन्वंगीशयनसहासनांगपाळी-
सल्लापप्रमुखसमक्षमोदनाकात् ।
लोको न प्रभवति शर्मणेऽतिदृष्टिः
कार्या तन्न निरशनादिमा व्रताळिः ॥ ८ ॥

स्थूलोऽहं तनुरहमित्यबाधमत्या
चैतन्यं वपुषि न तत्परश्शरीरी ।
सादृश्यं वहति ममांगमित्यसौ धी-
रात्मा मे सुखपदमित्यदुष्टबुद्ध्या ॥ ९ ॥

चत्वारि क्षितिजलवह्निवातभेदात्
तत्त्वानि प्रभवति चेतना चतुर्णाम् ।
स्वच्छन्दोपनतसमन्वयप्रभावात्-
किण्वादेर्मदशकनं यथा प्रतीतम् ॥ १० ॥

मुक्तिस्स्यादिह समये शरीरनाशो
भोगस्तु प्रबलतमा रतिर्वधूभिः ।

देवास्ता रतिसुखदा मनोहराङ्ग्यः
श्रुत्यामप्यगणि मतं गुरुप्रवृत्तम् ॥ ११ ॥

इत्येतत् सुरगुरुदर्शनं न भो(ग्यो)ग्यं
स्वीकार्या श्रुतिरपि लिङ्गधीस्सुधीभिः ।
ताभ्यामप्यनुमितिशाब्दधीप्ररोहा-
त्तन्मत्या न विश—[1]न चोपरोधः ॥ १२ ॥

चार्वाकाः क्षुदुपशमं वितर्क्य भुक्त्या
तच्छान्त्यै स्वयमुपभुञ्जते व्यतीतम् ।
श्रुत्वाप्तैरभिहितमादृतार्थतत्वा(त्त्वा)-
दानादीनपि च वितन्वते विशंकम् ॥ १३ ॥

दृष्ट्वार्थैरगदनिमित्तमन्त्रमुख्यै-
र्निष्कर्षादनयनगोचरेऽभिधेये ।
तत्वा(त्त्वा)दिप्रकटनधुर्यतां प्रपन्न-
श्शब्दोऽपि प्रमितिकृदुत्तरोभ्युपेयः ॥ १४ ॥

यद्यन्यत्र भुवनमस्ति दैवतं वा
हानिर्नो न भवति शीर्यतां क्रमेण ।
ते स्यातां यदि निहतः परः कृतान्ती(न्ते?)
तच्छास्त्रातिगतिरनर्हतामुपैति ॥ १५ ॥

अर्थेहार्थकनयशास्त्रभावबन्धो
धर्म्येऽर्थे भुजजनुषां हिताय चौर्यम् ।

---

1. Two letters broken off.

हेतुत्वादवनविधावनंगशास्त्रं
वाञ्छायां निजमहिळाप्रवृत्तिहेतुः ।। १६ ।।

कर्तव्या नियतमनादिवेदमूला-
स्सन्ध्याद्या निपुणसमादृताश्चिराय ।
कायार्थव्ययभयमूलकस्तु तेषां
सन्त्यागो न हि महतां सृतिं भजेत ।। १७ ।।

विज्ञाता निजमतिपूर्वकप्रवृत्तिः
नित्योऽणुर्निरवयवः स्वयंप्रकाशः ।
प्रत्यक्त्वं दधदपि भोक्तृतां शरीरी
देहान्यो निगमशतेन सिद्धमेति ।। १८ ।।

स्वर्गेच्छू रचयतु यज्ञमित्यनादि-
भूते(ता)वागिति विदुषा व्रतादि कर्म ।
कर्तव्यं दृगविषयस्सुधाशलोकः
स्वीकार्यस्सुकृतिजनादरैकभूमिः ।। १९ ।।

भानान्मे तनुरिति बुद्धितो दृगाद्यै-
र्वेद्यत्वादनवगमाद्दृगाद्ययोगे ।
अज्ञत्वात्सततविकारभाजनत्वात्
नित्यान्या भजति तनुर्न चेतनैक्यम् ।। २० ।।

पादे मे शिरसि च वेदनेति जानन्
एकात्माहमिति मतौ प्रतीयमानः ।
अग्राह्यो नयनमुखैस्समाधिभाग्भिः-
स्संवेद्यस्तनुभृदुपैति देहभेदम् ।। २१ ।।

संसर्गातिशयकृता यथा मनीषा
सन्तप्ते भवति नृणामयोविकारे ।
पिण्डोऽसौ दहन इति स्वयं तथैव
स्थूलस्स्यामहमिति जायते प्रतीतिः ॥ २२ ॥

स्वाभेदप्रमितकरी स्वगोचरा धी-
र्भेदिन्या न तनुधियोपमां बिभर्ति ।
सद्मेदं मम भवतीति या मनीषा
भेदार्था तदुपमितिं समावहन्त्या ॥ २३ ॥

सिद्ध्यन्ति प्रबलतमेन मानभूम्ना
तत्त्वानि क्षितिमुखतत्त्वभेदवन्ति ।
तद्योगानवगमबाधितत्वशंका
नैव स्यादतिकरणे प्रमाणवेद्ये ॥ २४ ॥

संसर्गात् क्षितिजलवह्निमारुतानां
चैतन्यं भवति तनाविति प्रक्लृप्ता ।
वार्तापि स्वयमयते विरामवार्तां
सूरीणां सदसि विकल्पवादभीता ॥ २५ ॥

मुक्तोऽयं तनुभृदुपैति दिव्यलोकं
नावृत्तिं भजति समश्नुते च कामान् ।
इत्येव श्रुतिशिरसा विमुक्तिसिद्धे
नैव स्यात्तनुविलयादिकं विमुक्तिः ॥ २६ ॥

तन्नेदं सुरगुरुदर्शनं विमुक्त्यै
दैत्येभ्यः कथितमिदन्तमोमयेभ्यः ।

सत्वस्थैरतुलविसीममोदकामै-
रुद्वीक्ष्यं न भवति दूषितं महद्भिः ॥ २७ ॥

इत्येवं मनसि निधाय वीतराग-
स्सौमित्रिर्हरिनगरीवरोपकण्ठे ।
निष्कामावसथयता भुवि प्रतीता-
मापेदे पुरमथ कोयिलूरभिख्याम् ॥ २८ ॥

अद्राक्षीत्कतिचिदहानि दर्शनं तत्
जीवानामपि परमस्य यत्र चैक्यम् ।
वर्णानामपि विधिधूननं गृहादौ
वैतृष्ण्यं भवविगमोऽपि बोधभूम्ना ॥ २९ ॥

साधीयो न मतमिदं यतो न सिद्ध्येत्
कैंकर्यं नियमयितुः पदारविन्दे ।
तद्ग्राह्यं मतमितरन्मयेति मत्या
सौमित्रिस्समयमुमापतेर्जगाहे ॥ ३० ॥

सौमित्रिः प्रतिदिनमानमन्नुमेशं
तत्पादद्वयगतनिश्चलात्मचित्तः ।
संद्रष्टुं त्रिपुरहरं सुहृत्परीतः
प्रायासीत्पुरमनु शाक्यदुर्गसंज्ञाम् ॥ ३१ ॥

प्राचीनैरपि निखिलैरनूनबोधैः
श्रीवासः परमतयोच्यते प्रमाणात् ।
तत्तत्वं प्रकटयतु स्वयं पुरारि-
स्सौहार्दादिति स विचिन्तयन्नवात्सीत् ॥३२॥

तत्रत्यं त्रिणयनमानमन् विनीत-
स्सौमित्रिस्सुहृदभिसंवृतः पुरस्तात् ।
कारुण्योपचिततदीक्षणाभिकांक्षी
बिल्वादिप्रसदनमानसोऽवतस्थे ॥ ३३ ॥

संपश्यन् मुरजयिनं परं पुरारि-
स्सौहार्दान्नतहृदयं विधातुकामः ।
बिल्वादीनितरकरे करेऽदसीये
विन्यस्तामतनुत मालिकां तुळस्याः ॥ ३४ ॥

सौमित्रिः किमिदमिति प्रहर्षसान्द्र-
स्तत्रत्यानपि निखिलानुवाच वाचम् ।
व्यावृत्तिस्त्रिणयनवीक्षणानुभावात्
युष्माकं मम च विभाविता निकामम् ॥३५॥

बिल्वैकायतनपुरारिरत्नगेहे
प्रादुष्यान्न हि तुळसीकथालवोऽपि ।
सत्येवं कथमपतत्करद्वये वो
बिल्वं मत्करयुगळे दळं तुळस्याः ॥ ३६ ॥

तन्मित्रैर्मतिकुशलैर्विचारपूर्वं
कर्तव्यो विधिरधुनैव शिक्षणीयः ।
नैवातः परमहमंबुधौ भवाख्ये
निक्षेप्तुं चरणयुगन्न (गच्च) पारयामि ॥३७॥

इत्युक्त्वा विरमति लक्ष्मणे वयस्या
निष्कर्षं व्यदधुरिमं विमर्शमूलम् ।

सौमित्रिर्मुरहरदर्शनाय जात-
स्तद्वक्षः पदतुळसीदळानुमानात् ॥ ३८ ॥

नन्तव्यं सरसिजलोचनांघ्रियुग्मं
सौमित्रे ननु भवतेति तं जहुस्ते ।
संत्यक्तस्तदनु स मित्रमण्डलीभि-
स्संप्राप्तो हरिनगरीमुदग्रवप्राम् ॥ ३९ ॥

नान्या मे गतिररविन्दचक्षुषोस्मा-
दित्येवं स धृतमतिः प्रभूतभक्तिः ।
श्रीवासं हरिनगरी सदा निवासं
सौहार्दादनुदिवसं ननाम भूयः ॥ ४० ॥

ख्या(व्या)तानीदथ तमसीमभक्तिभूमिं
श्रीवासः स्वपदपङ्कजं निनीषुः ।
आत्रेयान्वयमणिवेङ्कटार्यविद्व-
त्कारुण्योपचितकटाक्षवीचिमग्नम् ॥ ४१ ॥

आत्रेयस्तमकथयद्विनीतभूषं
सौमित्रिं भवमरुखेदभेदबुद्धिम् ।
लक्ष्मीशं शरणमवेहि पूरुषार्थं
तत्प्राप्तिं शरणव्रतिं हितं गरीयः ॥ ४२ ॥

तत्त्वादिप्रकटनधुर्यशास्त्रदानात्
लक्ष्मीशो नमदवनं विधातुकामः ।
आदत्ते निखिलविदां वपुर्गुरूणा-
मित्यर्थं प्रकटमुदाहरन्त्यभिज्ञाः ॥ ४३ ॥

यद्धाम्नः प्रभवति भासनाय नाग्नि-
नार्को वा न हिमरुचिर्न कालकाल्यम् ।
यद्दिव्यं भवति समश्नुते पदं तत्
क्षेत्रज्ञो गुरुवरदिव्यदृष्टिभूम्ना ॥ ४४ ॥

आचार्यप्रवरकटाक्षदुग्धधारा-
संसेकात् भजति नरो यमर्थसारम् ।
नैष स्याद्द्वियुगळपञ्चषास्तु खाद्यैः
खद्योताः किमु तमसां कुलं क्षिपन्ति ॥४५॥

सत्वस्थं समहृदयं समाधिनिष्ठं
सद्वृत्तं समुदितसर्वशास्त्रसारम् ।
संसिद्धं गुरुवरसंप्रदायभूम्ना
शान्ताद्यं गुरुतिलकं भजेत भूष्णुः ॥ ४६ ॥

अस्त्यार्यो विहृतिपदं गुणावलीनां
जन्मान्यं निगमवतंसदेशिकस्य ।
जीवातुर्भवगरळावदादभाजा-[1]
माचार्यो मम करुणातरंगवार्धिः ॥ ४७ ॥

लक्ष्मीपुर्यभिधसदग्रहारभाजां
श्रीनल्लानभिजनसिन्धुकौस्तुभानाम् ।
आर्याणां सुविदितचक्रवर्त्यभिख्या-
भूषाणामहमपि वीक्षयास्मि धन्यः ॥ ४८ ॥

1. Read ...गरळावसादभाजा-

श्रीरामावरजमुनिस्सुभाषितानां
नैजानां पुनरवनौ प्रवर्तनाय ।
संजज्ञे नियतमनः प्रबोधभूमिः
श्रीरंगादिमरघुपुंगवानुजार्यः ॥ ४९ ॥

अस्मद्देशिकमणिपादपद्मसेवा-
साम्राज्यं यदि तव राघवानुजन्मन् ।
कैवल्यं तव करयोरवेहि साधो
वाच्यस्यां विशयकथा मुधेति मन्ये ॥ ५० ॥

जातास्ते जगदवनाय धूतकामाः[1]
कैवल्याश्रमिकुलधूर्वहावतंसाः ।
आहुर्यान् विबुधकुलानि पूर्णबोधान्
श्रीरंगादिमरघुनन्दनानुजाख्यान् ॥ ५१ ॥

आत्रेयो वेङ्कटार्यो हरिपुरतिलको वाचामुक्त्वा समीचीं
तां तां क्षेत्रज्ञबृन्दावनविधिचतुरां संमतामादिवाचाम् ।
आचार्यस्तोत्रमालामपि शुभमतिभिस्सादरं सेव्यमानां
प्रादाद्रामानुजाय प्रभवति महतां मानसं भक्तभूत्यै ॥५२॥

इति दासचरित्रे पञ्चमस्सर्गः ॥

---

1. संजातो जगदवनाय निस्पृहेन्दुः

## अथ षष्ठस्सर्गः

आत्रेयवेङ्कटकृती गुरुसंस्तुतिं यां
प्राचीकशन्निखिलपङ्कदिवाकराभाम् ।
तामद्य नैकभवसंचितपुण्यभूम्ना
जिह्वा गृणाति मम फल्गुकथावसन्ना ॥ १ ॥

श्रीरङ्गलक्ष्मणमुनिं मम देशिकेन्द्रं
त्रय्यन्तकाननविहारधुरीणसिंहम् ।
सेवे यमाहुरनघा उपपत्तिभूम्ना
वेदान्तसूरियतिराडपरावतारम् ॥ २ ॥

आचार्यवर्यमनघं शरणं प्रपद्ये
श्रीरङ्गलक्ष्मणमुनिं प्रथितं पृथिव्याम् ।
श्रीवासपादसरसीरुहनित्यसेवा-
संपत्तिसान्द्रतरमोदभरावलीढम् ॥ ३ ॥

न्यासेन नित्यमखिलानवितुं धरण्या-
मुद्भूतमद्भुतविशीमयशोनिधानम् ।
सौम्यार्यमार्यकुलसेव्यपदारविन्दं
श्रीरङ्गलक्ष्मणमुनिं गुरुसार्वभौमम् ॥ ४ ॥

श्रीरगङ्गलक्ष्मणयतीन्दुपदारविन्द-
सेवाधनेन धनिनो महदग्रगण्याः ।
पश्यन्तु संस्कृतिमिमां करुणारसार्द्राः
स्वाचार्यदिव्यचरितामृतलेशदिग्धाम् ॥ ५ ॥

वित्तस्पृहाकलितदुर्वसुधेशसेवा-
दुर्वारवेगगरळाकुलचित्तवृत्तिः ।
श्रीरङ्गलक्ष्मणगुरूत्तमकीर्तिमाला-
दिव्यौषधं परिचिनोमि विकुण्ठवीर्यम् ॥६॥

उद्यानपत्तनमृगीदृगनंगचन्द्र-
मन्दानिलादिमकथाकथनातुरोऽहम् ।
बध्नामि रङ्गरघुराडनुजार्यवृत्तं
मुग्धस्य मे भवतु कर्म सतां क्षमायै ॥ ७ ॥

श्रीरङ्गलक्ष्मणमुनेश्चरितं गभीरं
मन्दाग्रगण्यसरणौ पथिकोऽहमस्मि ।
सत्येवमप्यगणयन् परिहास्यभावं
स्तुत्यां यते गुरुगुणावलिसंप्रणुन्नः ॥ ८ ॥

आवासभूमिरनवद्यकलावलीना-
मुद्यानभूरमलसद्गुणसञ्चयानाम् ।
तार्क्ष्यः कुदृक्कुलभुजङ्गममण्डलीना-
मार्यस्तनोतु विततिं मदभीप्सितानाम् ॥९॥

श्रीरङ्गलक्ष्मणमुनौ प्रणतिः प्रसिद्ध्येत्
प्राक्(ग्) जन्मसंचिततपोविभवेन पुंसाम्[1] ।
यत्सूक्तिसन्ततिमयूरकुलाद्भयेन
दूरं प्रयान्ति परदर्शनवादिनागाः ॥ १० ॥

---

1. विभवो यदि स्यात्

सन्ति प्रबन्धरचनाकुशला: पृथिव्यां
किन्ते भजन्ति गुरुपुङ्गवसाम्यकक्ष्याम् ।
खद्योतनामवहनेन परं स कीटः
प्रद्योतनेन भजते किमु तौल्यगन्धम् ।। ११ ।।

संसारदावदहनाकुलवारिवाहान्
न्यासाभिधानमणिरक्ष[ण*] दुर्गभूतान् ।
श्रीरङ्गलक्ष्मणमुनेः कलयन् प्रबन्धान्
कुर्वीत किन्नु हृदये मनुजोऽन्यशुंभान् ।।१२।।

श्रीरङ्गलक्ष्मणमहागुरवे नमस्याः
कुर्वे नतेन शिरसा मनसा च वाचा ।
यस्मादभूद्वकुळभूषणसूक्तिभाष्य-
सारार्थसंग्रह इति प्रथितः प्रबन्धः ।। १३ ।।

श्रीरङ्गलक्ष्मणगुरोरपरं भवाब्धे-
रुत्तारकं न मनुते हृदयं मदीयम् ।
नैशं तमोऽतिनिबिडं परिमार्ष्टुमीष्टे
किं वा सहस्रकिरणादपरो जगत्याम् ।।१४।।

यस्मै मतङ्गजधराधरशेखरेण
भूदेवसंस्तुतिसमोदहृदा वितीर्णम् ।
नल्लानितीव (ह?) बिरुदं द्विजपुङ्गवाय
तस्यान्ववायजनुषे महसे नमः स्तात् ।।१५।।

यद्यस्ति भाष्यजलधाववगाहनेच्छा
यद्यस्ति धीर्वकुळभूषणसूक्तिवृत्तौ ।

यद्यस्ति देशिकवचः पयसां पिपासा
श्रीरङ्गलक्ष्मणमुनिं भजताविशङ्कम् ।। १६ ।।

श्रीरङ्गलक्ष्मणगुरुर्दिशतु प्रभूतं
भव्यं यदीयपदपद्मजुषो महान्तः ।
वादाभिधानरणरंगविहारधुर्य-
दुर्वादिदन्तिकुलकेसरितां भजन्ति ।। १७ ।।

वाचान्तराकलनतः कृतिमण्डलीनां
नास्मद्गुरोरिव वचोभिरुदेति मोदः ।
खद्योतसन्ततिभिरम्बुरुहप्रसादो
जायेत किन्नु सरसीरुहबन्धुसाध्यः ।। १८ ।।

आर्योक्तिभिस्सह पराणि निबन्धनानि
तुल्यानि केचन वदन्ति न तेन हानिः ।
जानाति किन्नु शिशुरन्तरमल्पमेधा
रत्नस्य काचशकलस्य च विद्यमानम् ।।१९।।

दुर्वादिगर्वहतिधूर्वहता गतेन
योगीन्दुना यदि भवेत् कलहोऽलसानाम् ।
ध्वांक्षावलिः खगपतिश्च कुतः क्षुधार्तौ
स्पर्धां समारचयतो न मिथो विरोधात् ।।२०।।

सारादिसंग्रहनिबन्धनदुग्धधारा-
दूरापनुन्नमनुजाळिभवाभितापम् ।
पापौघदुर्दमदावळपञ्चवक्त्रं
न स्तौति कः स्तुतिपदं कृतिसार्वभौमम् ।।२१।।

सम्यग्विवेकिभिरिदं निपुणं विभाव्यं
को वा भवेदिह सदृङ्मुनिशेखरेण ।
नानादिगन्तरनिरन्तरगीयमान-
दिव्यापदानशतनित्यनिवासधाम्ना ॥ २२ ॥

श्रीरङ्गलक्ष्मणगुरुर्दुरितावलिर्मे
दूरीकरोतु कृतिनो यमुदाहरन्ति ।
पद्मानिवासकरुणापरिवाहगीता-
सारार्थदानविबुधालयशाखिवल्ली ॥ २३ ॥

दुर्वादजांघिकदुरुक्तनितान्ततान्त-
वेदान्तसन्ततिमनोहृतिधूतिधुर्यः ।
भद्रैकबन्धुगुणसिन्धुरसीमभूमा-
श्रीरङ्गलक्ष्मणकृती हृदि मे चकास्तु ॥ २४ ॥

श्रीरङ्गलक्ष्मणमुनेश्चरणारविन्दे
वन्देऽथ नैकभवसंकलिताघशान्त्यै ।
यत्र स्वरक्षणभरन्यसनं जनानां
वाञ्छापदानि बहुलानि फलानि सूते ॥ २५ ॥

श्रीरङ्गलक्ष्मणमहागुरुकेसरीन्द्रः
कृत्स्नाघमण्डलमतंगजदारणेन ।
मुक्तानुबन्धमतुलं कलयन्नराणा-
मद्यापि भाति निगमान्तवनान्तराळे ॥ २६ ॥

श्रीरङ्गलक्ष्मणमुनिर्विदधातु मह्यं
प्रज्ञानमज्ञजनगाढतमो विभेदी ।

निक्षेपगोचरदुरूहविचारदाक्ष्य-
मुद्वीक्ष्य यत्र मुदमेति कुलं बुधानाम् ॥ २७ ॥

रामानुजार्यमुनिधुर्यवचस्तरङ्ग-
नित्यानुषङ्गसमुदग्रविबोधभूमा ।
सीमाऽऽगमान्तयुगरक्षणपद्धतीनां
श्रीरङ्गलक्ष्मणमुनिश्शुभदोऽस्तु मह्यम् ॥ २८ ॥

त्रय्यन्तयुग्मपरिरक्षणभावबन्धान्
गुंभा(फा)न् गुरोर्गुरुतमान् कतिचित् त्यजन्तु ।
गृह्णन्तु वा न हि ततो भवतीह हानि-
र्हीयेत भानुरपि धूककुलावमत्या ॥ २९ ॥

भव्यं पदं नयतु देशिकसूक्तिगंगा
पद्मालयाकमनपादयुगानुषंगा ।
संसारदुस्तरदवानलदह्यमाना-
नस्मानभव्यपदवीपथिकानजस्रम् ॥ ३० ॥

श्रीरङ्गलक्ष्मणसुभाषितवारिराशि-
ग्रन्थार्थरत्नततिभूषितमानसानाम् ।
मूर्ध्ना वहामि चरणौ विबुधावलीनां
पद्मानिवासचरणार्पितमानसानाम् ॥ ३१ ॥

मुन्यग्रणीर्निगमशेखरदेशिकेन्द्र-
वाणीसुधारसनिषेवणनित्यतृप्तः ।
तन्वीत नैजपदपङ्कजनित्यसेवा-
संपत्तिसक्तहृदयं विनमन्तमेनम् ॥ ३२ ॥

पद्मापतिं सहजसौहृदभासमानं
क्षेत्रज्ञकर्मवशतः प्रतिघावलीढम् ।
न्यसेन धूतरुषमारचयन्मुनीन्द्रो
मय्यातनोतु सुभगानि मनीषितानि ॥ ३३ ॥

प्रालेयभूधरविसृत्वरगाङ्गवेणी-
वेगावधूननकलाकलितावताराः ।
वाचो यतिक्षितिभृतो मधुरा गभीरा
मह्यं कळङ्कबहुलाय मुहुः स्वदन्ताम् ॥ ३४ ॥

योगीन्द्रसूक्तिरचनामृतपूरसार-
सामोदमानसभृतां महतां समाजे ।
जाग्रत्यनल्पतमतेजसि हन्त जन्तुः
संसृत्युदन्वति परिभ्रमतीति चित्रम् ॥ ३५ ॥

श्रुत्यन्तदेशिकगभीरवचः प्रपञ्चः
प्राज्ञेतराकलितदुर्हृदयावसादात् ।
भीतिं जहाति नियतं मुनिसिंहटीका-
मालासमाकलितरक्षणभृष्टरूपः ॥ ३६ ॥

मन्ये सुधाशनतरुं वसुधासुराणां
मुक्तानुषङ्गकृतये रचितावतारम् ।
तापत्रयोपहतभूतहितैकसक्तं
श्रीरङ्गलक्ष्मणगुरुं यतिसार्वभौमम् ॥ ३७ ॥

श्रीरङ्गलक्ष्मणमुनिं स्तुहि मानसार्थं
यत्पादपङ्कजनिरन्तरसौहृदानाम् ।

आज्ञाकरी भवति माधवचित्तवृत्तिः
किं किं न साधयति कांक्षितमार्यसेवा ॥ ३८ ॥

आकृष्य नाकनिलयादमृतं नयन्तं
श्रीवासपादयुगळीवहनाल्लसन्तम् ।
निर्धूतजिह्मगतया विनताभिनन्द्यं
ताक्ष्यं विभावयति तं द्विजबृन्दवन्द्यम् ॥ ३९ ॥

दोषापनोदनधुरीणनिजप्रकाशं
पद्मालयोदयकृतं विलसद्रथाङ्गम् ।
पङ्कावमर्दनविधावतुलं मुनीन्द्रं
पाथोजबान्धवमवैति मनो मदीयम् ॥ ४० ॥

जिह्वाग्रनर्तनसकौतुकवाजिवक्त्र-
हेषानिनादमतिकल्पकभारतीकात् ।
श्रीरङ्गलक्ष्मणगुरोरपरं वृणीते
को वा जनो भुवि भवाम्बुनिधिं तितीर्षुः ॥४१॥

भिक्षाशनेऽवनिपतावपि लोष्टखण्डे
रुक्मे रिपौ सुहृदि बन्धुतदन्यलोके ।
बुद्धिस्सदृक्त्वविषया यदुपाश्रितानां
तस्मै नमोऽस्तु मुनये निरवद्यभूम्ने ॥ ४२ ॥

कुम्भीसुतो दुरितराशिपयोधिभंगे
शारीरकाम्बुजविकासविधौ दिनेशः ।
शान्तिक्षमादिगुणबृन्दनिवासभूमि-
र्नैकानि दाशतु शुभानि पतिर्यतीनाम् ॥ ४३ ॥

श्रुत्यन्तयुग्मपरिरक्षणजागरूके
न्यासान्तरङ्गतमदिव्यवचोझरीके ।
गीतागुरूक्तिसरसार्थविमर्शधुर्ये
चेतो गुरौ सरसमस्तु मुनीन्द्रच(व)र्ये ॥ ४४ ॥

श्रीरङ्गलक्ष्मणगुरून्मुनिसार्वभौमान्
चित्ते दधीमहि[1] विधूतदुरन्तकामान् ।
वक्त्रप्रभाविजितशारदसौम्यसोमान्
दीप्रान् कथाहवकृतोऽभिविधूय कामान् ॥ ४५॥

सीमाऽसमानगरिमामलसद्गुणानां
भूमावमानमहिमाखिलशास्त्रधामा ।
वामाभिमानतनिमा [शुभ[2]?] नामभूमा
कामावमाननकृदस्तु मुनिस्सुधामा ॥ ४६ ॥

आह्लादकं प्रणयिनाममृतप्रदानात्
पङ्कापहं प्रचुरदीधितिविस्तरेण ।
दाहावहं कुटिलसंसृतिवारिराशे-
स्तेजस्त्वयं गुरुमवैमि महोनिधानम् ॥ ४७ ॥

शङ्काशताकुलितशाङ्करभाषितानि
पैतामहस्फुरणदारणदारुणानि ।
श्रीरङ्गलक्ष्मणमुनेर्ग्रथितानि मन्ये
शर्वोपदेशगिरिशक्रशरासनानि ॥ ४८ ॥

---

1. दधेमहि इति भाव्यम् ।
2. These two letters are broken.

भक्त्या विरोधवचनं क्वचनावलीनं
गौणीबभूव कमलातनुभाववाणी ।
न्यासो न हेतुरिति वागपि धूतसेतुः
केतौ सतामवति नैगमवर्त्मशैलीम् ।। ४९ ।।

भूयाच्चिरं गुरुरसौ यतिराजवाणी
वेणीनिरन्तरविचिन्तनमोदमानः ।
त्रय्यन्तसूरिचरणारुणवारिजात-
युग्मैकसंकलितमानसराजहंसः ।। ५० ।।

अपनयतु मदीयां तामसीं वृत्तिमार्यः
समुपनयतु मह्यं नित्यमध्यात्मविद्याम् ।
रचयतु मम भक्तिं निस्तुलामस्तपङ्कां
कलयतु हृदयं मे वेदचूडार्थसक्तम् ।। ५१ ।।

इत्थं श्रीरङ्गरामानुजगुरुतिलकस्तोत्रमात्रेयदृष्टं
निर्धूताशेषदोषं विनमदभिमतिस्वस्तरुं शस्तसेव्यम् ।
तस्यां हर्यादिपुर्यां सरसिजनिलयावासतीर्थावगाहो
नत्वा पद्मानिवासं समजपदतुलानन्दसान्द्रो नतेन्द्रः ।। ५२ ।।

इति दासचरित्रे षष्ठस्सर्गः ।।

श्रीमते श्रीनिवासपरब्रह्मणे नमः ।।

## अथ सप्तमस्सर्गः

अथ लक्ष्मणो गुरुनुतिं परमां
प्रजपन्नघावलिविघातकरीम् ।
अभजत्क्रमेण दुरितोपरतिं
न हि भव्यकृद्भवति मोघविधिः ॥ १ ॥

अपयत्सु केषुचिदहस्सु गुरुं
स ययौ प्रणन्तुमधिरङ्गपुरम् ।
निवसन्तमादृतपुराणवचो-
मकुटद्वयीवितरणैकरतिम् ॥ २ ॥

अभिगम्य रङ्गनगरीं प्रणमन्
कमलामहीपरिगतं पुरुषम् ।
स कवेरराजतनयासविधे
विलसन्तमाश्रममवाप मुनेः ॥ ३ ॥

स समीक्ष्य संयमितपोवनिकां
गणनातिभूमिमहिमातुलिताम् ।
शुकशारिकामुखशकुन्तकुली
निनदाधिकां प्रणमति स्म मुहुः ॥ ४ ॥

अनुवासरं स विनयावनतो
भयमेदुरो बहुलमोदयुतः ।
प्रणनाम संयमिनिवासभुवं
गुरुदिव्यवीक्षणघनादरधीः ॥ ५ ॥

कथयस्त्वयं तदनु तस्य मतं
भवतीति भावमददात्स गुरुः ।। ११ ।।

बुबुधे न किञ्चन मुनेर्हृदयं
स च लक्ष्मणः प्रतिदिनं प्रणमन् ।
इति तस्य रङ्गनगरे वसतः
त्रितयं जवादत्र ययौ शरदाम् ।। १२ ।।

प्रणिनंसुरत्र समये स गुरू-
रथमज्जनाह्वयपुरीकमनम् ।
हरिदातरप्रथितशिष्यसदा-
लसदात्मपार्श्वयुगलः प्रययौ ।। १३ ।।

स च रङ्गलक्ष्मणमुनेश्चरणौ
परिमण्डनं विरचयन्मनसि ।
अनुगच्छतीव विनयावनतो
वपुषालसन्नमलसत्त्व इव ।। १४ ।।

रथमज्जनेऽपि नगरे न्यवस-
न्मुनिसार्वभौमपदपद्मरतिः ।
गुरुदृक्पदं मुरजिदीक्षणतो
भविता कदायमिति चिन्तनया ।। १५ ।।

वसतः क्रमेण पुरि तत्र पुन-
र्विनमन्मणेष्षडभवन्शरदाम् ।
अनुवासराकलितदेशिकदृङ्-
नवदुग्धवीचिपरिपातधियः ।। १६ ।।

इति तस्य तावदनुचिन्तयतः
पुरतो बभूव तिलको यमिनाम् ।
रचयाञ्चकार स तदा प्रणती-
र्बहुला मुनीन्द्रपदपङ्कजयोः ॥ १७ ॥

अनु तं समीक्ष्य यतिनामधिपो
विनतं दृशा सदयशीतलया ।
तदभीप्सितावगमबद्धमतिः
पुरतःस्थितानिदमुवाच वचः ॥ १८ ॥

अयमानमन् क्व वसति क्व भवः
किमपेक्षते किमिति मां नमति ।
निखिलं तदेतदवनीविबुधाः
परिपृच्छ्यतां शुभदृशा वचसा ॥ १९ ॥

समुदीरितैरिति स भूमिसुरै-
रभिचोदितो जननमात्ममतम् ।
कथयाञ्चकार विनयेन भिया
निहताञ्जलिश्शिरसि वाचमिमाम् ॥ २० ॥

कमलानिवासकरुणावसति-
र्नगरी विभाति हरिपुर्यभिधा ।
कथयन्ति यां प्रथितसत्यपुरी-
सविधस्थितां द्विजकुलाकलिताम् ॥ २१ ॥

पुरि तत्र जन्म मम वैश्यकुले
वसतिर्महीसुरपदाब्जभुवि ।

प्रणमामि संयमिकटाक्षझरी-
परिरम्भसम्पदनुबद्धमतिः ।। २२ ।।

न हि संयमीन्द्रकरुणामृततो
हृदि भावये किमपि वस्तु परम् ।
सरसीरुहाक्षचरणाम्बुरुह-
द्वयसेवनाधिकृतिनित्यरतिः ।। २३ ।।

धनदारसद्मसखिबन्धुसुत-
प्रमुखं तदेतदखिलं सहसा ।
परिभूय[1] संयमिमणीन्द्रघृणा-
मयसंपदे स्पृहयते हृदयम् ।। २४ ।।

गुरुसार्वभौमकरुणैकमते-
रभवन्बहूनि दिवसानि मम ।
अधुनापि नैव लभतेऽभिमतिं
विनतोऽयमाहितदुरन्तरुचिः ।। २५ ।।

शरणं वृणे गुरुमणेश्चरणौ
भवतः पुरो विरचयन्महितान् ।
न महत्पुरस्करणमस्तफलं
स्थिरधीजुषां भवति कर्म नृणाम् ।। २६ ।।

इति लक्ष्मणः स्वहृदयं निखिलं
विनिवेद्य भूमिसुरसंहतये ।

---

1. परिभूय

अगमद्वचोविरतिमात्तभयो
महतां सदस्स्वधिकभाषणतः ।। २७ ।।

रघुपुङ्गवानुजमनोरथम-
प्यखिलं द्विजा निजगदुर्गुरवे ।
नतसात्कृतागमवतंसमुहुः-
परिमृग्यमाणकमलानिधये ।। २८ ।।

स निशम्य संयमिमणिः कथितं
धरणीसुरैरिदमुवाच वचः ।
विदधत्पुराभिलषितं रघुरा-
डनुजन्ममानसपरीक्षणधीः ।। २९ ।।

अभिनन्द्यमस्य हृदयं ततिभि-
र्महतामनेकजननोपचितैः ।
सुकृतैः प्रसिद्ध्यति मनस्तदिदं
पुरुषोत्तमापचितिनित्यरति ।। ३० ।।

निवसन्ति केचन गुणैरधिकाः
कृतिनो भवाम्बुनिधिकर्णधराः ।
निगमान्तदेशिकवचोरसिकाः
तदुपाश्रयोऽस्य हितकृन्नियतम् ।। ३१ ।।

इति देशिके कथयति स्वमतं
स निशम्य वैश्यमणिरात्तभयः ।
किमितः करोमि कतमश्शरणं
भवितेति मुग्धधिषणस्समभूत् ।। ३२ ।।

बहुलैर्दिनैर्मुनिपदाब्जयुगं
शरणं निधाय हृदि हृष्टमनाः ।
अभवं ध्रुवं मुररिपुः स्वपदे
रचयिष्यतीति विगळद्विशयः ॥ ३३ ॥

अधुना पुनर्मुनिमुखाम्बुरुहात्
मदभीप्सितात्परमभूद्वचनम् ।
समुदीक्षते किमु मम स्थिरता-
मथवा भवेदिदमृतं कथनम् ॥ ३४ ॥

विदधातु वा न हितमात्मकृतं (ते?)
न परित्यजामि यमिपादयुगम् ।
इति निश्चयं सकलयन् हृदये
प्रणतेः पदं व्यरचयद्यमिनम् ॥ ३५ ॥

कथयाञ्चकार स वचः प्रणमन्
परमं धनं मुनिपदाम्बुरुहात् (हम्?) ।
मनुते मनो मम ततो गुरुभिः
करुणापदं नतजनः क्रियताम् ॥ ३६ ॥

इति तां निशम्य गिरमार्यमणिः
करुणातरङ्गततिपूर्णमनाः ।
समुदीक्षणेन सुखयन्परितो
रघुपुङ्गवानुजमवोचदिदम् ॥ ३७ ॥

मतिरस्ति चेन्मयि दृढा भविता
वृषशैलशेखरमणेर्दयया ।

निखिलं हरेरनुपमातिशया
न तनोति किं नु नतवत्सलता ॥ ३८ ॥

निगदैर्गुरोरथ नतो मुमुदे
विधनो धनैरिव सुतैरसुतः ।
सरसीरुहावलिरिवांशुमता
कुमुदावलीव हरिणाङ्करुचा ॥ ३९ ॥

अधिगम्य संयमिकृपालहरीं
भवदावहव्यवहमानहरीम् ।
रघुपुङ्गवानुजनुरात्महितं
कलयाञ्चकार करयुग्मगतम् ॥ ४० ॥

रथमञ्जनादिमपुरे दयया
समुपागतं व्रजवधूकमनम् ।
प्रययौ प्रणन्तुमधिपो यमिनां
सह शिष्यकोटिभिरुदारमनाः ॥ ४१ ॥

रुचिरप्रभाभरतरङ्गमुहुः-
परिभूतनैकशततिग्मकरम् ।
अनुगच्छति स्म स यतिप्रवरं
वपुरन्विता स्वगुरुभक्तिरिव ॥ ४२ ॥

अवसन्मुनी रथनिमग्नपुरे
परमात्मचिन्तननिरन्तरधीः ।
विनतावलीनिहितनित्यवचो-
मकुटीयुगीहृदयदिव्यमणिः ॥ ४३ ॥

समयेऽत्र तादृशि निशम्य कथां
कतिचिज्जना रघुसुतानुजने: ।
प्रतिरोधका रथनिमग्नपुरीं
प्रतिघावलीढहृदया: प्रययुः ।। ४४ ।।

रथमग्ननाम्नि नगरे महसा
परिमण्डितं कमपि संयमिनम् ।
रघुपुङ्गवानुजगुरुं प्रति ते
गिरमूचुरेवमभिमानहताः ।। ४५ ।।

त्रिपुरारिदर्शनकुलप्रभवो
रघुपुङ्गवानुजनुरीषदपि ।
हृदयं निवेशयितुमन्यमते
क्षमते नु जाग्रति च बन्धुकुले ।। ४६ ।।

कतिचिद्धना हितधियो मनुजा
घनसम्पदं तमनुचिन्त्य मुहुः ।
अनृतोपजापचतुरा वचनै-
स्सममोहयन्निममजातधियम् ।। ४७ ।।

उपकण्ठशिष्यजनभाषणतः
परमस्य तस्य हृदयं समये ।
यतिभूपतेरिति कथं मुनयो
न विदन्ति हन्त तदिदं विमतम् ।। ४८ ।।

अधुनापि न क्षतिरितो यतिन-
स्तमिमं त्यजन्तु सह तेन वयम् ।

प्रतिगन्तुमात्तहृदया न यदि
स्वयमुद्यतास्तदुपसंग्रहणे ।। ४९ ।।

इति लक्ष्मणप्रतिभटैरुदितं
स मुनिर्निशम्य विनतावलिभिः ।
कुरु दिव्यदेशततिसन्नमनं
सहसेति सन्नतमुवाच गिरम् ।। ५० ।।

उपश्रुत्य वाणीं यतीशानजातां
स रामानुजो मोदवाराशिमग्नः ।
प्रतस्थे प्रणामाय दिव्यालयानां
सदाचार्यनिघ्ने(घ्नस्य?) किं वा दुरापम् ।।५१।।

इति दासचरित्रे सप्तमस्सर्गः ।।
श्रीमते श्रीनिवासपरब्रह्मणे नमः ।।

## अथ अष्टमस्सर्गः

लक्ष्मणो यमवदीशनिदेशं
सन्नतेन शिरसा प्रतिगृह्णन् ।
आर्यपादनतिपूर्वमयासी-
द्दिव्यदेशभगवद्भजनाय ॥ १ ॥

दर्शनेन रघुपुङ्गवसेतो-
र्ब्रह्महापि शुचितामुपयाति ।
इत्युदीक्ष्य रघुराडनुजन्मा
कुम्भसम्भवदिशं स जगाम ॥ २ ॥

प्रस्थितं तमनुमोदभरार्द्र-
स्तत्प्रतीपनिवहोऽनुजगाम ।
अध्वना निजहितेन नियत्या
यात्यसाविति विधूतविशंकम् ॥ ३ ॥

लक्ष्मणोऽप्यनुगतं द्विषदोघं
वीक्ष्य निश्चयमिमं विततान ।
यापितोऽपि विमतैरनुयोगं
नैव वच्मि किमपीति सुमत्या ॥ ४ ॥

मौनितामुपगते नतिधुर्ये
लक्ष्मणे तदनु तद्विषदोघः ।
स्वाभिलाषहननोद्यमदक्षं
वीक्ष्य तं समभवद्गतमोदः ॥ ५ ॥

सोऽप्यहर्दिवमनूद्धतचित्तः
पूजयन्निजगुरोश्चरणाब्जम् ।
नैव किञ्चन चकार हृदि स्वे
निस्पृहस्य जगती तृणरूपा ।। ६ ।।

आगतः पथि स कुत्रचिदारात्
वाहिनीं कमलकोमलवेणीम् ।
वीक्ष्य तत्र चकमले (चकमे) ललितायां
स्नानकर्म तरणावुदयस्थे ।। ७ ।।

लक्ष्मणस्य हृदयं हतकामं
बन्धुतापि समुदीक्ष्य जहौ तम् ।
तत्समागमविधौ विहताशा
तामसीव विकृतिर्धृतदेहा ।। ८ ।।

प्रद्रुते रिपुकुले पथि गच्छन्
लक्ष्मणस्समवलोक्य विमानम् ।
सत्यभूधरपतेर्मणिदीप्तं
भक्तिभारविनतः प्रणनाम ।। ९ ।।

सत्यसद्मनि लसन्तमनन्तं
सत्यपुण्यसरसीतटभाजि ।
सत्यशैलमणिरादृतसत्यं
सत्यया कलितमानमति स्म ।। १० ।।

सत्यबन्धुमभिगम्य स नैकान्
वासरान् विनतसत्यमुदारम् ।

जन्मभूमिमभजत्कमलाक्षो
यत्र तिष्ठति ददत्पुरुषार्थान् ।। ११ ।।

तत्र कानिचिदहानि महद्भि-
स्सूदितानि कथितानि स शृण्वन् ।
श्रीनिवासचरणाम्बुजसेवा-
सम्पदा पुनरमंस्त कृतार्थम् ।। १२ ।।

तत्र बन्धुनिवहस्तमुदारं
वीक्ष्य विस्मितमतिर्बहुमानात् ।
दायभाग्भिरयमेष्यति किंस्वि-
त्संगमित्यमनुतादरभूम्ना ।। १३ ।।

नाततान पुरतः प्रणमन्तीं
बन्धुतामपि स लोचनमार्गे ।
संकथादिषु कथा किमु सिद्धये-
त्तेन दीप्यदनवद्यगुणेन ।। १४ ।।

स स्थिराद्भुतमनोहरभावः
श्रीनिकेतनपदाम्बुजयुग्मम् ।
भावयन्हरिपुरान्निरगच्छ-
द्दर्शनाय रघुपुङ्गवसेतोः ।। १५ ।।

एनसामपगमाय जगत्यां
निर्मितं जनकजाकमनेन ।
जन्मसंचरजराहतिहेतुं
सेतुमूरुभवकेतुरपश्यत् ।। १६ ।।

देशिकेक्षणविरोधिनिरोधं
चेतसा स कलयन्नमदिन्दुः ।
नैकपातकनिराकृतिधुर्यं
वार्यगाहत रघूत्तमसेतोः ।। १७ ।।

इत्थमीक्षितरघूत्तमसेतो-
स्तस्य दिव्यविषयोपगमादीन् ।
वर्णयामि तदुपासनबोध-
स्वानुभूतिपरपद्यशतेन ।। १८ ।।

तीरे मृगाङ्कसरसः प्रणवस्वरूपे
श्रीरङ्गनाम्नि सदने रचिताभिलाषः ।
श्रीभूमिसंवलितपार्श्वयुगस्तनोतु
प्रार्थ्यं प्रसादममरैरपि रङ्गनाथः ।। १९ ।।

श्रीरङ्गम् ।। १ ।।

चेतो विलोकय मुरारिममुं निरस्त-
स्वर्धामदिव्यनिचुळापुरधूर्वहोऽयम् ।
यद्दिव्यदेहसुषमा विजिता बभूवुः
पद्मामहीप्रभृतयोऽपि मनोज्ञवेषाः ।। २० ।।

उरयूर् ।। २ ।।

तंजापुरीवरमणिं भज नीलमेघं
लक्ष्मीतटित्परिगतं नरपञ्चवक्त्रम् ।
योऽसावमर्त्यरिपुतंजविपाटनेन
तेने जगन्निलखिमेतदपास्ततापम् ।। २१ ।।

अळगियमणवाळन् ।। ३ ।।

प्रेमालयाधिपममन्दमयूखहृद्यं
भोगीन्द्रभोगशयनं भृगुयोगिवन्द्यम् ।
पद्मालयासुभगपार्श्वयुगं मनो मे
गाढोपगूहनसुखं न जहाति नित्यम् ।। २२ ।।

अन्बिल् । तिरुवडिवळगियनम्बि । अळगियवल्लि ।। ४ ।।

चेतः कदम्बनगरीतिलकं भुजंगे
निद्राणमब्जभवशङ्करवन्द्यमानम् ।
लक्ष्मीपतिं भज यदीयसहासवीक्षा-
वेणी धुनोति दुरितं निखिलं जनानाम् ।। २३ ।।

करम्बनूर् । पुरुषोत्तमन् ।।५।।

वीक्षस्व चित्त विशदाद्रिशिरोमणिं तं
श्रीपुण्डरीकनयनं कमलालतायाः ।
दृष्टया विना भवति यस्य न हर्षहेतु-
स्सर्गस्थितिप्रळयविभ्रमनाटिकेयम् ।। २४ ।।

तिरुवेळ्ळरै । पुण्डरीकाक्षन् । अमृतवल्लि ।। ६ ।।

श्रीपक्षिभूतपुरबन्धुमकुण्ठचापं
रामं तनोमि नतिकर्म यदीयबाणाः ।
कान्तापहारकृतमन्तुदशास्यरक्ष-
शिशिक्षाविधानसकलावगतप्रभावाः ।। २५ ।।

पुळ्ळंभूतंकुडि । वल्विलिरामन् ।। ७ ।।

श्रीरा(ना?)मपत्तनशिरोमणिमिन्दिरेशं
चेतः कुरु स्वदयितं निरवद्य हृद्यम् ।

योऽपूपकुम्भकुहरार्पितपाणिपद्म-
शशेते भुजङ्गशयनेऽम्बुजवल्ल्युपेतः ॥ २६ ॥
तिरुप्पेर् नगर् । अप्पकुडत्तान् । कमलवल्लितायार् ॥ ८ ॥

दृष्ट्वाऽऽदनूरधिपतिं कमलालयायाः
कान्तं मि(वि?)मानपतिमानतभागधेयम् ।
चेतोऽनुभूय निरवद्यसुखं कृतार्थं
भूयः न चैतदपरं भजनीयमस्ति ॥ २७ ॥
आदनूर् । आण्डाळुक्कुमप्पन् । श्रीरङ्गनायकि ॥ ९ ॥

वीक्षस्व चित्त रथमग्नपुरीधुरीणं
यं गोसहाय इति वक्ति जनोऽखिलोऽपि ।
रक्तारविन्दलतिकानयनोत्पलश्री-
लीलावशंवदममन्ददयापयोधिम् ॥ २८ ॥
तेरुळुन्दूर् । आमरुवि ॥१०॥

शार्दूलपूः पतिमपूर्वमहाम्बुराशि
ख्यातं पयोधिसुतया कलितावतारम् ।
श्रीनन्दवर्धनविमानकृताधिवासं
भे(चे)तो भजस्व निगमाञ्चलमृग्यमाणम् ॥२९॥
शिरुपुलियूर् । अरुमाकडल् ॥११॥

आलोकयाम्बुजमनोज्ञकरारविन्दं
श्रीसारभूतिलकमानतभूरिभाग्यम् ।
यस्सह्यजा चिरतपः परिपोषहृष्ट-
स्तस्यै ददौ निजपदाम्बुजवारिसाम्यम् ॥ ३० ॥
तिरुच्चेरै । सारनाथन् ॥१२॥

श्रीमूर्धशंखपुरपुण्यकृतोदयाय
नाम्ना नवीनविधुरित्यखिलोदिताय ।
श्रीमूर्धशंखवनिता महिताय तुभ्यं
कुर्वे नमांसि हरिणाङ्कविमानगाय ॥ ३१ ॥

तिरुत्तलैच्चंगणान्मदियन् ॥१३॥

श्रीकुम्भघोणनगरी कृतसन्निधानं
सानन्दकोमललतानयनाब्जभानुम् ।
आलोकयार्यहृदतृप्तसुधाभिधानं
श्रीशार्ङ्गपाणिमनिलादतनौ शयानम् ॥ ३२ ॥

तिरुक्कुडन्दै । आरावमुदन् ॥१४॥

पश्यामि खण्डिपुरमौळिमणिं रमेशं
यो रुद्रशापहर इत्यभिधां दधाति ।
कुम्भीतनूभवतपोधनदुर्विभाव्य-
दुस्साधदुस्सहतपः परिणामरूपः ॥ ३३ ॥

तिरुक्कण्डियूर् । अरन्शापंतीर्तवन् ॥१५॥

श्रीव्योमपुर्यधिपतिस्तनुतां शिवं मे
स्वीयप्रती (दी?) पशुभनैकगुणाम्बुराशिः ।
श्रीविष्णुधामवसतिर्वसुधासमेतो
यो रोमशादिमतपोधनसेवितांघ्रिः ॥ ३४ ॥

तिरुविण्णहर् । उप्पिलियप्पन् ॥१६॥

श्रीशौरिराजमवलोकय चित्त देवं
श्रीकृष्णदिव्यनगरी विहितावतारम् ।
यस्याननं समवलोक्य विधूतदीप्ति-
र्नूनं विधुर्वहति नीलदळे तनुत्वम् ॥ ३५ ॥

तिरुक्कण्णपुरम् । शौरिराजन् ॥१७॥

केदारमोदवरमार्यमनो भज त्वं
यं व्याहरन्ति परिरम्भपुरीधुरीणम् ।
आस्ते सुधाघटलताभिधयोपगूढो
देव्याष्टवर्णसदने परकालभोग्यम् ॥ ३६ ॥

तिरुवालि-तिरुनगरि । वयलालिमणवाळन् । अमृतघटवल्लि । अष्टाक्षरविमानम् ॥ १८ ॥

चित्तं मदीयमधुना न परत्र याति
श्रीनागसुन्दरवपुः परिरम्भधन्यम् ।
अस्त्वेतदेवमिति सुन्दरवल्लिकेन्द्रं
सम्भावयामि विलसत्सुषमाविशेषम् ॥ ३७ ॥

तिरुनागै । अळहर् ॥ १९ ॥

मेधाविशान्तिधनदिव्यतपोविपाकः
श्रीगन्धपत्तनमणिर्मणिमौक्तिकाख्याम् ।
वापीं भजन् दिशमुदीक्ष्य पुरन्दरस्य
श्रीवासधामनि वसन् मयि संनिधत्ताम् ॥३८॥

तिरुनिरैयूर । नम्बि ॥ २० ॥

नन्दीपुराम्बरपुरीमणिरेव सेव्यो
मन्दारधामवसतिर्जगतामधीशः ।
यस्सन्तताभिलषितार्थविधानधुर्यः
स्वव्यक्तितोषितशिबिक्षितिपालनन्दी ॥ ३९ ॥
नन्दिपुरविण्णहरम् । जगन्नाथन् ॥ २१ ॥

सच्छीलवल्लभसुतो हरिणाङ्कवन्द्यः
श्रीचन्द्रमः पुरमणीचिरभागधेयम् ।
श्रीपुण्डरीकलतिकामधुरावलोक-
ज्योतिर्विवृद्धनिजदीधितिरस्तु चित्ते ॥ ४० ॥
इन्दळूर् । मरुविनियमैन्दन् ॥२२॥

श्रीचित्रकूटनिलयं कमलासहायं
गोविन्दमादिमसुरावलिसेव्यमानम् ।
वन्देय यद्वपुरुदारनवाम्बुवाह-
मुद्वीक्ष्य तिल्लभुवि नृत्यति नीलकण्ठः ॥ ४१ ॥
गोविन्दराजन् ॥२३॥

श्रीरामपुष्करपुरीरमणं मुरारिं
सम्भाव्य मानसमिदं मम मोदमेति ।
येनाखिलावनमहामखदीक्षितेन
लोकत्रयी परिगता निजविक्रमेण ॥ ४२ ॥
काळिश्रीरामविण्णहरम् । ताडाळन् ॥२४॥

मन्येत को हृदि लघूनि सुरान्तराणि
सन्त्यज्य संगमपुरीमणिमिन्दिरेशम् ।

सन्नन्द्य नन्दकमुनीन्द्रतपः प्रसन्नो
यश्शुद्धसत्त्वसदनं निलयं चकार ॥ ४३ ॥
कूडलूर् । वैय्यंकात्तपेरुमाल् ॥२५॥

श्रीपार्थसारथिरिति प्रथिताभिधानं
श्रीकृष्णपत्तनपुरातनभाग्यभूतम् ।
देव्यारविन्दलतया परिरब्धपार्श्वं
संचिन्तयामि हरिमुत्पलधामनाथम् ॥ ४४ ॥
तिरुक्कण्णंकुडि । श्यामलमेनिप्पेरुमाल् । अरविन्दवल्लि ॥ २६

देव्याभिषेकलतयोत्पलधाम्नि भान्तं
कृष्णाङ्गनापुरमणिं वरुणादिवन्द्यम् ।
श्रीभक्तवत्सलममुं हृदि यस्तनोति
नैवोदरं पुनरुपैति जनो जनन्याः ॥ ४५ ॥
तिरुक्कण्णमङ्गै । भक्तवत्सलन् ॥ २७ ॥

देव्या रमामणिलताभिधयोपगूढं
देवं कपिस्थलपुरीतिलकं भजामः ।
यो वारणेन्द्रवरदः मरुदात्मजाय
व्यक्तीचकार कनकाकृतिधामनि स्वम् ॥ ४६॥
कपिस्थलम् । गजेन्द्रवरदन् ॥ २८ ॥

मा मुञ्च रूप्यनगरीनिलयं विचित्र-
कोदण्डराममुररीकृतनागतल्पम् ।
सेव्यं पराशरपुरन्दरनाभिजातै-
र्दत्तादरं हृदयशोभननाम्नि धाम्नि ॥ ४७ ॥
तिरुवेल्लियंकुडि । कोलविल्लिरामन् ॥ २९ ॥

श्रीनागदिव्यनगरीं दशभिः परीतां
शौरेर्गृहैरधिवसन् मणिधामनाथः ।
गृह्णातु मां कमलवल्ल्युपगूढपार्श्वो
देवः पुलोमतनयागिरिजेशवन्द्यः ॥ ४८ ॥

तिरुनागूर् । नन्दाविलक्कुपेरुमाल् । पुण्डरीकवल्लि ॥३०॥

पुष्पेषु पुङ्गपतिरादृतवेदधामा
रक्तारविन्दतिलकानयनाभिरामः ।
दीव्यद्भुजङ्गमपुरन्दरभोगतल्पे
निद्रालुरस्तु शिवदो मम कैटभारिः ॥ ४९ ॥

तिरुत्तेत्ति अम्बलम् । शेङ्गण्माल् । शेङ्गमलवल्लि ॥३१॥

सञ्जीविपूर्वगृहधाम्नि सतो मुरारे-
स्स्यामौपमन्यव्रतपः फलदिव्यमूर्तेः ।
भद्रैकतानपुरुषोत्तमनायिकायाः
भर्तुः प्रमुक्तपुरीमणिधूर्वहस्य[1] ॥ ५० ॥

वण्पुरुषोत्तमम् । पुरुषोत्तमन् ॥३२॥

श्रीहेमधामाधिपतिर्मुरारि-
र्महादयाधीशविभुर्मुदेऽस्तु ।
यश्शूलपाणौ कृपया निवासं
तेने विमाने कनकाभिधाने ॥ ५१ ॥

शेम्पोन्शेय्कोयिल् । पेररुळाळप्पेरुमाल् ॥३३॥

---

1. Better read प्रमुक्तपुरुषोत्तमधूर्वहस्य ।

श्रीसक्तसंसदधिपः शुभदोऽस्तु मह्यं
नाथः पयोधिदुहितुर्विबुधाधिनाथः ।
येनाङ्ग्यकार्यतुलशोभनधाम दिव्यं
वेधस्तनूजमुनिवर्यतपः फलेन ॥ ५२ ॥

तिरुत्तेवनार्तोगै । देवनायकन् ॥ ३४ ॥

अनवाप्य नभः पुराधिराजं
यमिनोदङ्कमहीसुरेण दृष्टम् ।
विहितादरमुच्चशृङ्गधाम्नि
प्रभुमप्यालप दुग्धकुम्भवल्ल्याः ॥ ५३ ॥

अरिमेयविण्णकरम् । कुडमाडुकूत्तप्पेरुमाल् । अमृतघटवल्लि-नाच्चियार् ॥ ३५ ॥

वैकुण्ठविष्णुपदपत्तनधामतेजो
वैकुण्ठवल्ल्युपहितं हृदये ममास्तु ।
येन व्यधाय्युपरिचारिवसावुदङ्के
वीक्षा पितामहमुखैरपि दुर्विभाव्या ॥ ५४ ॥

वैकुण्ठविण्णगरम् । वैकुण्ठनाथन् । वैकुण्ठवल्लि ॥ ३६ ॥

मणिकूटपुरी निरीक्षिता (तेयं?)
मणिकूटाधिपतिर्गतिर्मम स्यात् ।
विनतासुतचन्द्रयोः प्रसादं
व्यतनोद्यः कनकालयं प्रपन्नः ॥ ५५ ॥

तिरुमणिक्कूडम् । नाथन् ॥ ३७ ॥

पार्थपुर्युपनतेन स नाथः
पद्मिनीप्रियतमेन भवेयम् ।
पार्थशङ्करजलेशहितेच्छु-
स्संबभूव करुणाभरितो यः ॥ ५६ ॥
पार्थन्पळ्ळि । तामरयाळ्केळ्वन् ॥३८॥

मित्रसैन्यपतिपर्वतकन्या-
कान्तवन्द्यपदपङ्करुहेण ।
धातृधामनिलयेन कृतार्थो
दैवतेन परकालनतेन ॥ ५७ ॥
तिरुक्कावळंपाडि । गोपालकृष्णन् । स्वयम्भूविमानम् ॥३९॥

सितपुष्करिणीपतेश्शरण्या-
दपरं भावय मा मनस्सुधाशम् ।
कमलालयवारिजाक्ष्यधीशो-
ऽकृत यः श्वेतनृपोग्रयोर्मनीषाम् ॥ ५८ ॥
तिरुवेळ्ळकुळम् । कण्णन् । नारायणन् । पूवार् तिरुमकल् नाच्चियार् ॥ ४० ॥

इति चोलमहीकृतावतारा-
नखिलानम्बुधिजापतीन् विभाव्य ।
स्वमनोहरपूरुषार्थलाभा-
दधिकामाप मुदं स लक्ष्मणाख्यः ॥ ५९ ॥

इति दासचरित्रे अष्टमस्सर्गः ॥
श्रीमते श्रीनिवासपरब्रह्मणे नमः ॥

॥ शुभमस्तु ॥

## अथ नवमस्सर्गः

अथ मानस पाण्डुदेशजाता-
नवतारानरविन्दलोचनस्य ।
प्रसमोक्ष्य कृतार्थतां दधीथा
न परं भावय दैवतं मुरारेः ॥ १ ॥

मणिनूपुरवाहिनीतरङ्गा-
निलशीतोपवनैकमानसस्य ।
वृषभाचलधूर्वहस्य दास्यं
वरये नान्यदवैमि सूरिसेव्यम् ॥ २ ॥
तिरुमालिरुम्शोलै । अळकर् ॥ ४१ ॥

देवं फणीन्द्रमृदुलास्तरणाभिधानं
गोष्टीधुरन्धरमुपैमि पतिं जगत्याः ।
योऽसौ कदम्बमुनिदेवपती व्यधत्त
स्वोपार्जितातुलतपः परिणामभाजौ ॥ ३ ॥
तिरुक्कोट्टियूर् । उरगमेल्लणयान् ॥ ४२ ॥

श्रीसत्यसंज्ञकविमानकृताभिधानं
सत्यागमक्षितिपतिं नतसत्यमीडे ।
सत्याह्वयप्रियतमाकलितावतारं
यं सत्यमाहुरखिलात्मकमागमान्ताः ॥ ४ ॥
तिरुम(मे)य्यम् । सत्यगिरिनाथन् ॥ ४३ ॥

फुल्लकाननतपोधनभाग्यं
भद्रवल्ल्युपगतं जगदीशम् ।
चिन्तयाम्युदधिरोधसि शिश्ये
योऽम्बुधि प्रसदनाय सुधन्वा ॥ ५ ॥

तिरुप्पुल्लाणि । जगन्नाथन् ॥ ४४ ॥

श्रेयस्तुषारसरसीपतिरेष दद्या-
द्यो देवचन्द्रसदनेऽन्नवधूपरीतः ।
शार्दूलवल्लभरमापतिशल्यपाण्ड्या-
नङ्गीचकार करुणाभरशीतदृष्ट्या ॥ ६ ॥

तिरुत्तण्गाल् । तण्कालप्पन् । अन्ननायिकै । पुलिक्कुं
श्री वल्लभनुक्कुं पाण्डयनुक्कुम् ॥ ४५ ॥

स्वस्तुत्यमोहनपुरीरसिकं भजामि
नीलाम्बुदं प्रथितकेतकिधामधुर्यम् ।
देव्या च मोहनलताभिधयेक्ष्यमाणं
वेधः कपर्दिमुखदेवसमर्चितांघ्रिम् ॥ ७ ॥

तिरुमोकूर् । काळमेघन् ॥ ४६ ॥

सम्पश्य संगमनोहरदेवमेतं
देव्यादृतं वकुळवल्लिकया विमाने ।
अष्टाङ्गनाम्नि भृगुशौनकविष्णुचित्तै-
रध्यक्षितं परजिदीडितपादपद्मम् ॥ ८ ॥

तेन्मतुरै । कूडलळगर् ॥ ४७ ॥

श्रीधन्विनूतनपुरे वटपत्रशायी
गोदासितेततरकटाक्षविवृद्धधामा ।
वस्तुत्वमावहतु मे यदपाङ्गभूम्ना
मण्डूकसंयमिमणिस्समभूत्कृतार्थः ॥ ९ ॥

श्रीविल्लिपुत्तूर् । वटपत्रशायि । आण्डाळ् ॥ ४८ ॥

पूर्णस्थितादिमपतिः कुरुकापुरीशो
देव्यादिनाथलतया समुदीक्ष्यमाणः ।
गोविन्दधामनि विधातृशठारिमुख्यै-
स्सानन्दमीडितपदोऽवतु सन्ततं माम् ॥१०॥

आळ्वार् तिरुनगरि । पोळिन्दुनिन्रपिरान् ।
आदिनादवल्लि ॥ ४९ ॥

श्रीतुल्यधन्विशुभधूर्वहमम्बुजाक्षं
श्यामाक्ष्युपेतमुदितं कुमुदाख्यधाम्नि ।
यातः पतिश्श्वसनजिष्णुसमर्चितांघ्रि
कुर्वे हृदम्बुजसलीलविहारधुर्यम् ॥ ११ ॥

तोलैविल्लिमंगलम् । देवपिरान् । करुंतडंकण्णिनाच्चियार्॥५०

पद्माभिधानपुरि निस्सममेघवर्णं
भद्रालयौशनसपुष्करिणीसमोदम् ।
शुक्रप्रजापतिमृडादृतपादपद्मं
चित्ते दधी(धे)महि किमन्यदितो विधेयम् ॥ १२ ॥

तिरुप्पेरै । निहरिल् मुहिल्वण्णन् । शुक्रपुष्करिणी ॥ ५१ ॥

वैकुण्ठवल्ल्युपहितं विधुधामनाथं
वैकुण्ठदिव्यनगरीभुवि तस्करेन्द्रम् ।
वैकुण्ठनाथमरविन्दविलोचनं त्वा-
मीडे पृथुक्षितिपवासवसेव्यमानम् ।। १३ ।।

श्रीवैकुण्ठम् । कल्लपिरान् ।। ५२ ।।

नाथेन दक्षिणकुळुन्दैकदुरन्धरेण
मायानटेन महितेन कुळुन्दैवल्ल्या ।
आनन्दसद्मनिरतेन कटाक्षितोऽस्मि
येनामरेन्द्रगुरुराप्तमनोरथोऽभूत् ।। १४ ।।

तिरुक्कुळुन्दै । पेरुंकुळम् । मायक्कूत्तन् ।। ५३ ।।

वराङ्गनादिव्यपुरीधुरीणं
वराङ्गनोपेतममर्त्यनाथम् ।
स्थितं गृहे नन्दनवर्धनाख्ये
नुमस्तुतं धातृमुखैरमर्त्यैः ।। १५ ।।

श्रीवरमङ्गै नगर् । देवनायकन् ।। ५४ ।।

चिञ्चापुरीतिलकमञ्चति मानसं मे
भूकान्तमम्लनगरीलतिकासनाथम् ।
यो वेदसारसदने भुजगे शयनः
प्रत्यक्षितो वरुणनैर्ऋतधर्मराजैः ।। १६ ।।

तिरुप्पुळिंगुडि । कायिशिनवेन्दन् । भूनादन् ।। ५५ ।।

वरगुणप्रमदापुरकेतनो
विजयकोटिविमानकृतासनः ।
मयि दृशं तनुतां विजयासनो
विनतलोकसमुद्यदघास(श?) नः ॥ १७ ॥

वरगुणमङ्गै ॥ ५६ ॥

कर्णजपाख्यनगरीकलितावतारं
कोळूर्लतादृतमवैमिमहानिधीशम् ।
नागेशयं जलधिजाकरधाम्नि दिव्ये
यक्षेशसंचिततपः फलसारभूतम् ॥ १८ ॥

तिरुक्कोलूर् । वैत्तमानिधि । श्रीकरविमानम् ॥ ५७ ॥

वीक्षस्व वामनपुरीलतिकासनाथं
सन्मान्यवामनपुरीतिलकं मुरारिम् ।
यः पञ्चकेतकविमानमवाप्य दीर्घ-
हेमाकृतिर्गिरि(श)शापमपाचकार ॥ १९ ॥

तिरुक्कुरुंगुडि । नींडपोन्मेनिनंबि । कुरुंगुडिवल्लि ॥ ५८ ॥

अथ पर्वतदेशचारिताथ्यं
भगवान् कर्तुमनाश्चकार यानि ।
भज मानस तानि निर्विशेषं
शुभरूपाणि सरोजलोचनस्य ॥ २० ॥

भूयादनन्तपुरबन्धुरपारभूमा
यो हेमकूटसदने हरिलक्ष्म्युपेतः ।

चन्द्रेन्द्ररुद्रनुतपादपयोजयुग्म-
शेते भुजङ्गशयने मृदुळेऽब्जनाभः ।। २१ ।।
तिरुवनन्तपुरम् ।। ५९ ।।

पद्मप्रकर्षपरिचारपुरीधुरीणं
पद्मालसद्धृदमुपैमि सरोजवल्ल्या ।
आलिङ्गितं सुकृतिकारिनुतं वलारि-
कल्याणधामनिरतं शठवैरिगीतम् ।। २२ ।।
तिरुवण्परिचारम् । तिरुवाल्मार्बन् । इन्द्रकल्याण-
विमानम् ।। ६० ।।

धन्योऽस्मि दैवतमुदीक्ष्य शठारिसूक्ति-
सक्रीडदक्षिणमरुत्तटलोकतातम् ।
ख्यातं यतेन कपिलेन महाविभूत्या
देव्या समं रुचिरपुष्कलधामहृद्यम्[1] ।। २३ ।।
तिरुक्काट्करै । तेन्काळ् करै अप्पन् । पेरुं शेल्वनायिकै ।
पुष्कलविमानम् ।। ६१ ।।

श्रीमूळिधाम्नि घटनर्तकमाद्रिये तं
सौन्दर्यसद्मसरसं शठवैरिसूक्त्या ।
आमोदितं हरितशान्तिघनोपक्लृप्त-
सेवाफलं मधुरवेण्युपलालिताङ्घ्रिम् ।। २४ ।।
तिरुमूळिक्कळम् । तिरुमूळिक्कळत्तान् ।। ६२ ।।

1. धाम्नि दीव्यत् ।

श्रीव्याघ्रपुर्यधिपतिं पुरुषोत्तमाख्ये
धाम्नि स्थितं कनकवल्ल्युपभुक्तपार्श्वम् ।
मायेन्द्रमीडितपदं मुनिसप्तकेन
ध्यायन् जनः पुनरुपैति न देहयोगम् ॥ २५ ॥

तिरुप्पुलियूर् । मायप्पिरान् । पोर्कोडिनाच्चियार् ॥ ६३ ॥

श्रीशोणभूधरपुरीकमितात्पगोपो
रक्तारविन्दलतिकापरिरम्भधन्यः ।
भस्मासुरार्दितकपर्दिमनोरथाय
व्यक्ताकृतिर्हृदि विभातु जगद्द्युतीन्द्रः ॥ २६ ॥

जगज्ज्योतिविमानम् । तिरुच्चं (च्चें) कुन्नूर् । शिट्टारप्पन् ।
शं (शे) गमलवल्लि ॥ ६४ ॥

नारायणो मयि तनोतु दृशं दुरापां
पुष्पांगनाकलितनौनगरीधुरीणः
पद्मालयागजमहीभृदभीष्टदायी
योऽवातरत्करुणया निगमे विमाने ॥ २७ ॥

तिरुनावाय् । नारायणन् । मलर्मंगै नाच्चियार् ।
वेदविमानम् ॥ ६५ ॥

श्रीवल्लवाळवितृ धाम ददातु भद्रं
संपत्सुपल्लववधूसरसेक्षणार्द्रम् ।
घंटाश्रवोऽसुरनिरीक्षितपादपद्मं
तुर्याङ्गकोलनिलयं श्रयमाणनाथम्[1] ॥ २८ ॥

तिरुवल्लवाळ् । उरयुंकोनार् । शेल्वत्तिरुकोळन्दुनाच्चियार् ॥

---

1. Another more probable reading घण्टाश्रवोऽसुरनुतं चतुरङ्गकोलधामालयं जगदितं श्रयमाणनाथम् ॥

श्रीसारभृङ्गपुरसङ्गिनमङ्ग चेतो
मा मुञ्च कञ्जलतिकाकलितं विमाने ।
वेदालये धृतरतिं महतीमुनीन्द्र-
प्रत्यक्षितांघ्रिजलजं फणितालपतातम् ॥ २९ ॥

तिरुवण्वण्डूर् । पाम्बणैयप्पन् । कमलवल्लि ॥ ६७ ॥

अष्टाङ्गधामनिलयस्स परुष्णिहेशो
निद्राणकेशवविभुः कमलासहायः ।
यद्वद्व्यधत्त भृगुराममृगाङ्कयोस्स्वां
वीक्षां तनोतु मयि मञ्जुलशीत(ल)रस्याम् ॥

तिरुवाट्टारु । आदिकेशवन् । मरकदवल्लिनाच्चियार् ॥६८॥

विद्वद्धृदाह्वयपुरीसुहृदं रमेशं
तत्त्वावबोधसदनादृतसन्निधानम् ।
चक्षुःश्रवः परिबृडाश्रयमम्बरीष-
प्रत्यक्षितं नयनगोचरमातनोति ॥ ३१ ॥

वित्तुवक्कोडु । उय्यवन्दपेरुमाल् । वित्तुवक्कोट्टुवल्लि ।
तत्त्वज्ञानविमानम् ॥ ६९ ॥

श्रीमत्कटिस्थलधुरन्धरतातमीडे
नारायणं सुरमहीरुहवीरुदीन्द्रम् ।
श्रीपुण्यकोटिधरणीसरसीसमोदं
रुक्मांगदक्षितिभृदीडितपादपद्मम् ॥ ३२ ॥

तिरुक्कडित्तानम् । तिरुक्कडित्तानत्तप्पन् । कल्पकवल्लि ।
पुण्यकोटिविमानम् ॥ ७० ॥

पद्मासनाकलितवामनतातमीडे
वेधस्समीडचसरिदृद्धिमदार्तिहृेशम् ।
श्रीवामनालयरतं शठवैरिसूरि-
गाथापणायितशुभावहभूमभूमिम् ।। ३३ ।।

तिरुवारंविळै । तिरुक्कुरलप्पन् । पद्मासनै । वामन-
विमानम् ।। ७१ ।।

श्रीदेवनायकमुपैमि विधौ विमाने
वैकुण्ठवारिजदृशा सह राजमानम् ।
श्रीमत्फणीन्द्रपुरधूर्वहमादिदेवं
पक्षीन्द्रचन्द्रविनुतांघ्रिसरोजयुग्मम् ।। ३४ ।।

तिरुवहीन्द्रपुरम् । चन्द्रविमानम् । वैकुण्ठनायिकै ।। ७२ ।।

श्रीकारिधामनिरतं हृदि भावयामि
गोपालकं श्रितमृकण्डुबलिक्षितीशम् ।
यं गोपपत्तनवधूकमनं वदन्ति
गोपालपुर्यधिपतिं भुवि देहळीशम् ।। ३५ ।।

तिरुक्कोवुलूर् आयनार् । पूंकोवुल्नाच्चियार् । श्रीकर-
विमानम् ।। ७३ ।।

मध्यमक्षितिमणिं सुरनाथं
देहळीशमपि चित्त विभाव्य ।
धन्यमस्यथ विभावय देवान्
तोण्डमण्डलभवानपि सर्वान् ।। ३६ ।।

काञ्चीपुरे वरदराजममुं प्रपद्ये
संसेव्यमानमृषिभिर्मणिपुण्यकोटयाम् ।
यस्सुन्दरो नरहरिः करिशैलकुक्षौ
अध्यक्षितो विजयते गुरुणा सुराणाम् ॥ ३७ ॥
॥ ७४ ॥

पश्याधिकाञ्चि मणिसद्मनि वेदसारे
वध्वा मनोज्ञलतया सह भोगितल्पे ।
सन्तं यथोक्तकृतमादृत यो विनम्रान्
पुव्यामुनीन्द्रकणिकृष्णसरस्वतीशान् ॥ ३८ ॥
यथोक्तकारि । कोमलवल्लि । वेःक्का ॥ ७५ ॥

सेवेऽधिकाञ्चिपरमेश्वरपुष्करेशं
वैकुण्ठनाथमपराजितवल्ल्युपेतम् ।
सन्तं मुकुन्दभुवि पल्लवरायसूरि-
दृश्यो बभूव परकालगिरा नुतो यः ॥ ३९ ॥
परमेश्वरविण्णकरम् । परममदनादन् । वैकुण्ठवल्लि ।
मुकुन्दविमानम् ॥ ७६ ॥

श्रीपाटकेशममुमाश्रयते मनो मे
रुक्मिण्युपेतमुपलालितपार्थदौत्यम् ।
भद्रालये हरितयोगिसमञ्चितो यो
वेतालभूतपरकालमुखेड्य भूमा ॥ ४० ॥
पाडकम् । पाण्डवदूतन् ॥ ७७ ॥

दीपावभासममुमक्षि विलोकयार्य-
श्रीकारिसद्मनि हिमोपवनक्षितीशम् ।
वाण्यङ्गनासुचरिताम्बुजपद्मबन्धुं
यं व्याहरन्ति विनुतं परकालसूक्त्या ॥ ४१ ॥

विळक्कोटि । दीपप्रकाशन् । श्रीकरविमानम् । तिरुत्तण्का ॥

पाथोगृहाधिपतिरस्तु स मे शरण्यो
लोकेश्वरालयमणिर्जगदीशदेवः ।
मह्यंगनालतिकया मधुरं यमाहु-
रक्रूरशान्तिधनलोचनभागधेयम् ॥ ४२ ॥

नीरकम् । जगदीशप्पेरुमाल् । निलमङ्गवल्लि । जगदीश्वर-
विमानम् ॥ ७९ ॥

श्रीपुष्पधन्वनगरीपतिमानतानां
पुष्पेषुबाणकदनं न कदापि नृणाम् ।
यं कामवल्ल्युपगतं कनकालयेन्द्रं
सेव्यं भृगोरमनुतामृतभूतवाणी ॥ ४३ ॥

वेळुक्कै । मुकुन्दनायकन् । वेळुक्कैवल्लि । कनकविमानम्॥८०

पुंसूक्तधामनि निरस्तसमानवल्ल्या
भान्तं शिवेक्षितपदं परकालगीतम् ।
ज्योत्स्नेन्दुखण्डपतिमानमतामदम्भ-
श्शौचं क्षमेति विदितास्सुगुणा भवन्ति ॥४४॥

निलात्तिङ्गळ् तुंडत्तान् । नेरोरुवरिल्लावल्लि ॥८१॥

जीमूतधामतिलकं करुणाकराख्यं
पद्मामणीक्षितमुखाम्बुरुहं नताः स्मः ।
यो वामनालयवरे समभूत्प्रदातु-
मात्मानमम्बुवहधामतपोधनाय ॥ ४५ ॥

कारकम् । करुणाकरन् । पद्मामणिना । वामनविमानम् ।
कारकमहामुनि ॥ ८२ ॥

वर्षानिभोनरपतेश्चरणौ श्रितस्य
पुंसो न भीकरकराळकृतान्तघोषः ।
चोरस्य पङ्कजलताकमनस्य धाम्नि
श्रीपुष्कले निवसतो गिरिजार्चितस्य ॥ ४६ ॥

तिरुक्कार्वानम् । कळ्वर् । कमलवल्लि ॥ ८३ ॥

मनोज्ञबाणासनवल्ल्युपेतं
श्रयामि चोरेन्द्रपुरीसनाथम् ।
श्रीवामने धाम्नि वराहमादि-
मश्वत्थनारायणनेत्रपात्रम् ॥ ४७ ॥

तिरुक्कळ्वनूर् । आदिवराहन् । अञ्जिलवल्लि ॥ ८४ ॥

ग्रामालयाधिपमवैमि परं पुमांसं
लोकत्रयीक्रमणतोऽमृतवल्ल्यधीशम् ।
ग्रामालयोरगवरेण मनोज्ञसार-
श्रीकारिसद्मनि समीक्षितपादपद्मम् ॥ ४८ ॥

ऊरकम् । उळहळन्दप्पेरुमाल् । सारश्रीकरविमानम् ।
ऊरगमेन्गिर आदिशेषनुक्कु प्रत्यक्षम् ॥ ८५ ॥

पश्य प्रवाळरुचिपुर्यधिपं प्रवाळ-
वर्णं प्रवाळलतिकाकलितं प्रवाळे ।
सद्मन्युमाशिवहृदयाम्बुरुहैकहंसं
गीतं कवीन्द्रपरकालमुनीन्द्रसूक्त्या ॥ ४९ ॥

पवळवण्णम् । पवळवण्णन् ॥ ८६ ॥

चाञ्चल्यभागपि मनो मम शेषिणं तं
पद्मास्थितालयमणिं मनुते सदैव ।
यं भक्तवत्सलमुशन्ति च मत्सवित्री
कान्तं रमानिलयधाम्नि जलेशसेव्यम् ॥ ५० ॥

तिरुनिन्ऩूरु । भक्तवत्सलन् ॥ ८७ ॥

नौम्यादिकेशवममुं द्विचतुष्कबाहुं
व्योमाकृतौ मणिमये सदने वसन्तम् ।
दिव्याष्टबाहुनगरी कुसुमांगनेशं
मातंगराजदुरितावलिधूतिधुर्यम् ॥ ५१ ॥

अष्टभुजम् । आदिकेशवन् । अलर्मेल्मंगै । गगनाकृति-
विमानम् ॥ ८८ ॥

श्रीमत्पतत्रिसरसीनगरैकबन्धुं
मण्युज्ज्वले विजयकोटिविमानवर्ये ।
दत्तादरं विजयराघवदेवमीडे
भक्ते जटायुषि पदं परकालसूक्त्याः ॥ ५२ ॥

तिरुप्पुकुळि ॥ ८९ ॥

पाथोमहीधरपुरीकमनं जलाभं
नीलाब्ददीधितिमबद्रिविमानधुर्यम् ।
दीप्यन्महाकुसुमलोलदृशा परीतं
धन्या भजन्ति भृगुयोगिमुखार्च्यमानम् ॥५३॥

तिरुणीर्मलै । नीलमुहिल्वण्णन् । नीरवण्णन् । तोयगिरि-
विमानम् ॥ ९० ॥

वाराशिमल्लपुरनाथममुं भजन्तो
भाग्याधिकाः स्थलशयं धरणीसमेतम् ।
व्योमाकृतौ निवसतौ[1] भुजगे शयानो
यः पुण्डरीकपरमर्षितपःप्रसन्नः ॥ ५४ ॥

तिरुक्कडल्मल्लै । स्थलशायी । निलमङ्गै । गगनाकृति
(आनन्दनिलय) विमानम् ॥ ९१ ॥

वामोल(ल्ल) सत्सवितृदिव्यपुरीधुरीणं
देव्या मनोज्ञलतया सुभगं भजन्तु ।
कल्याणसद्मनि मृकण्डुसुतेन नित्य-
कल्याणदेवमनुगीतशुभापदानम् ॥ ५५ ॥

तिरुविडवेन्दै । नित्यकल्याणन् । कोमलवल्लि ॥ ९२ ॥

श्रीवीरराघवममुं परकालगीतं
देव्या सुवर्णलतया भुजगाधिरूढम् ।

---

1. आनन्दधाम्नि वसतौ

वीक्षावने विजयकोटिविमानसक्तं
वन्देय शालिमुखहोत्रकृतेऽवतीर्णम् ॥ ५६ ॥
तिरुवल्ळूर् । वीरराघवन् । कनकवल्लि ॥ ९३ ॥

बृन्दाटवीभुवि मुदा विहितावतारान्
नानालयान् प्रणतिकर्म तनोमि हृद्यान् ।
श्रीपार्थसारथिनृसिंहसुराधिराज-
श्रीरामरंगनृपतीन् जगदीशभेदान् ॥ ५७ ॥
तिरुवल्लिकेणि । बृन्दारण्यक्षेत्रम् ॥ ९४ ॥

योऽहं मदीयमपियन्निखिलं परस्मै
सिंहाय दिव्यघटिकाचलधूर्वहाय ।
यं व्याहरन्त्यमृतवल्लिकया मनोज्ञं
श्रीसिंहगोष्ठभुवि मारुतसूनुदृष्टम् ॥ ५८ ॥
चोळसिंहपुरम् । नरसिंहन् । शिंगकोष्टगतिविमानम् ॥ ९५ ॥

तुण्डीरमण्डलपुरातनभागधेय-
पाकायितातुलरमापतिरूपभेदान् ।
दृष्ट्वाधुना हृदय वस्त्वसि यक्षदिश्या-
नन्यान् विभावय धने धनिनो धृताशाः ॥ ५९ ॥

निस्सीमभूमवृषभाचलनाथमेतं
पद्मावतीपरिबृढं मनवै- - -[1] ।

---

1. भागोऽयं कीटभक्षितः ।

आनन्दधामसदने विहितावतारं
श्रीतोण्डमानवनिभृच्छिखिवाहसेव्यम् ।। ६० ।।
तिरुमलै । श्रीनिवासन् ।। ९६ ।।

श्रीमत्यहोबिलपुरे नृहरिं समीडे
लक्ष्मादृतं कृतमतिं कुरुकाविमाने ।
कायाधवादृतपदं सुरवैरिबक्षो-
विक्षोभरक्षितजगत्त्रयकीर्त्यमानम् ।। ६१ ।। ९७

साकेतदिव्यनगरीतिलकं भजाम
श्रीचक्रवर्तितनयं मणिपुष्कलेन्द्रम् ।
सीतापयोधरतटीधृतचन्दनाक्तं
देवर्षिकेकयसुतातनयेक्ष्यमाणम् ।। ६२ ।। ९८ ।।

श्रीनैमिशाधिपतिमाश्रय देवराजं
चेतस्सरोजलतया हरिधाम्नि सक्तम् ।
देवर्षिवासवसुधर्मचिरार्जितानां(नां)
यं प्राहुरुग्रतपसां परमं पुमर्थम् ।। ६३ ।। ९९ ।।

श्रीमूर्तिदेवमवलोकय चित्त साल-
ग्रामे श्रिया गगनधामनि सेव्यमानम् ।
प्रत्यक्षितं विधिगिरीशमुखैरमर्त्यै-
र्वारस्त्रियाप्युदितया भुवि कण्डकीति ।।६४।।१००।।

सेवेऽरविन्दलतया बदरीमुरारिं
श्रीतप्तकाञ्चनविमानवराभिलाषम् ।
यो रक्षितुं जगदिदं नरतामवाप्य
तस्मै मनूनुपदिदेश समं तदर्थैः ।। ६५ ।।१०१।।

चेतो घटीनगरधुर्यममुं भजेथाः
नीलाम्बुदं कमलवल्ल्युपलाल्यमानम् ।
ध्यातं सुधाशगुरुसूनुतपोधनेन
सन्मंगलालयतटे पुरुषोत्तमं तम् ।। ६६ ।।

कण्डमेण्णन् कडिनहर् । नीलमेघन् । पुण्डरीकवल्लि । मङ्गलविमानम् ।। १०२ ।।

गोवर्धनालयसदं फणिभोगतल्पं
रत्यावहं परिमलादिलतांगनायाः ।
अध्यक्षितं गिरिजया परकालसूक्त्या
पीतं नुमः परिधिधाम्नि परं पुमांसम् ।। ६७ ।।

परमपुरुषन् । परिमलवल्लि । गोवर्धनविमानम्।।१०३।।

कल्याणनारायणमादिदेवं
कल्याणवध्वादृतहेमकूटम् ।
श्रीद्वारकापत्तनदिव्यदीपं
सम्भावयामि द्रुपदात्मजेड्यम् ।। ६८ ।।

**द्वारकै** । कल्याणनारायणन् । कल्याणनाच्चियार् । **हेमकूट-विमानम्** ।।१०४।।

गोवर्धनेश मधुरापुरधूर्वहन् त्वां
गोवर्धनालयसदं श्रितसत्यभामम् ।
इन्द्रादिदैवतनुतं भजतां जनाना-
मार्तिं क्षिणोषि करुणाभृतयात्मदृष्ट्या ।। ६९।।

गोवर्धनेशन् । वडमधुरै । गोवर्धनविमानम् ।। १०५ ।।

श्रीगोकुलेऽत्र नवमोहनकृष्णमीडे
यो रुक्मिणीपरिबृढः श्रितहेमकूटः ।
चक्षुष्पथे समभवत्करुणारसार्द्रो
नन्दस्य यं समभजन्कुलशेखराद्याः ॥ ७० ॥
तिरुवाय्प्पाडि । गोकुलम् । नवमोहनकृष्णन् ॥१०६॥

क्षीराब्धिनाथमनुचिन्तय दुग्धवार्धा-
वष्टाङ्गधामनि पयोधिसुतासमेतम् ।
सन्तं भुजङ्गशयने यमुशन्ति देवं
ध्यातं पितामहपिनाकिपुरन्दराद्यैः ॥ ७१ ॥
तिरुप्पार्कडल् । कडल्महळ् ॥ १०७ ॥

अपराजिता पुरवरे श्रिया समं
परवासुदेवमवलोकयिष्यसि ।
बहुलाङ्गसद्मनि भुजङ्गमादिमै-
रियतैन[1]मानस जहीहि मा मुदम् ॥ ७२ ॥

परमपदम् । परमपदनाथन् । परवासुदेवन् । पेरियपिराट्टि-
यार् । अनन्ताङ्गविमानम् ॥ १०८ तिरुप्पतिगळ् ॥

श्रीसंपत्तनयमुदाहरामि वाचा
यं नारायणपुरधूर्वहं वदन्ति ।
यत्कान्ता यदुगिरिनायिका प्रतीता
दृष्टो यः पतगवरेण शर्मधाम्नि ॥ ७३ ॥

तिरुनारायणपुरम् । तिरुनारायणन् । शेल्वप्पिळ्ळै । आनन्द-
विमानम् ॥ १ ॥

---

1. Probably भुजङ्गमादिमैर्नियतैर्न् is intended.

श्रीमुष्णनामनि पुरे मणिमौक्तिकायाः
रोधस्युपाहृतगृहो निरवद्यधामा ।
श्रीमान्वराहवपुरुद्धृतदण्डकारि-
श्चेतोऽम्बुजं मम करोतु निवासधाम ॥ ७४ ॥
श्रीमुष्णम् । आदिवराहन् ॥ २ ॥

तं बृन्दावनभुवि राधिकासमेतं
राधावल्लभमुपयामि वासुदेवम् ।
यं राधारचिततपः फलं नमन्तो
मोदन्ते सह परमे नभस्यमर्त्यैः ॥ ७५ ॥ ३ ॥

श्रीपापनाशपुरधाममहोऽस्तु भूत्यै
यः पापनाशसदनेऽब्जदृशाब्जवल्लया ।
तिष्ठज्जयाहरणचोळनृपालदृष्टं
श्रीपुण्डरीकसरसीतटभासमानम् ॥ ७६ ॥ ४ ॥

स चम्पकारण्यमणिर्म्मुदेऽस्तु
समोहितो लोहितपद्मवल्लया:[1] ।
यं राजगोपालमुशन्ति धाम्नि
स्वायम्भुवे गोप्रळयादिसेव्यम् ॥ ७७ ॥ ५ ॥

श्रीभूतपुर्यां यतिराजवल्लया
समञ्चितं केशवमादिमीडे ।
व्यधत्त यो भाष्यकृति स्वदृष्टि-
मासूरिवंश्येऽपि च केशवार्ये ॥ ७८ ॥ ६ ॥

---

1. समुन्नतो लोहितपद्मवल्लया ।

इत्थमादृतमुरारिविभूति-
लक्ष्मणो मनुत धन्यतमं स्वम् ।
आत्मकांक्षितमनोरथसिद्धौ
सर्व एव हि जनो मुदमेति ॥ ७९ ॥

इति दासचरित्रे नवमस्सर्गः ॥

श्रीमते श्रीनिवासपरब्रह्मणे नमः ॥

## अथ दशमस्सर्गः

रामानुजस्तदनु देशिकसार्वभौमं
श्रीरङ्गलक्ष्मणमुनिं प्रणिनंसुरार्यम् ।
श्रीगोसखालयतया जगति प्रतीतं
दिव्यं जगाम नगरं रथमज्जनाख्यम् ॥ १ ॥

सौमित्रिरादरभरेण गुरोः पदाब्जं
नत्वा मुहुर्मुहुरविन्दत मोदभारम् ।
आर्योऽपि लक्ष्मणमुदीक्ष्य विषिस्मि(सिष्मि)येतं
नैकाम्बुजाक्षवपुरीक्षणधन्यरूपम् ॥ २ ॥

पप्रच्छ देशिकमणिर्विनतं पदाब्जे
धन्योऽसि किं भगवदालयसेवनेन ।
धूताः किमुस्विदरयस्तव बद्धवैरा-
श्चेतः किमु स्ववशतामुपयाति शान्तम् ॥ ३ ॥

धन्योऽस्म्यहं हृदयमप्यधुनोपशान्तं
सार्धं जनुर्मम जितान्यखिलेन्द्रियाणि ।
यस्माद्गुरोस्सदयपावनशीतरस्य-
गम्भीरवीक्षणभरेण तरंगितोऽस्मि ॥ ४ ॥

एवं नते मधुरभाषिणि संयमीन्द्रः
पार्श्वस्थमाह निजपादपयोजभृङ्गम् ।
श्रीचक्रवर्तिनमुदग्रसदार्यवंश्यं
श्रीमुष्णदिव्यनगरीमहदग्रगण्यम् ॥ ५ ॥

सौमित्रिरेष कुरुते मयि भावबन्धं
त्यक्त्वा कळत्रसुतसोदरबान्धवादीन् ।
तस्मादमुं कमललोचनपादपद्म-
सेवापदेषु तनुभृत्सु करोमि गण्यम् ॥ ६ ॥

एवं हि शास्त्रसरणिः परिधूतदोषा
स्वस्वामिपद्ममयकृन्तनमंशुलस्य ।
तद्वर्णधारणमुरस्यभिधाधृतिश्च
दास्यं चतुष्टयमिदं प्रवदन्ति विज्ञाः ॥ ७ ॥

आथर्वणे निगममूर्धनि दक्षिणे स्वे
वामे करे च बिभृयात्सदरं द्विजन्मा ।
चक्रं स्वकिल्बिषविधूतय इत्यभाणि
तुल्यं भुजोरुपदजन्मजुषामपीदम् ॥ ८ ॥

चक्रं दधद्विधृतपुण्ड्रतनू रमेशं
यो ध्यायति स्वरमनुं करणं विधाय ।
अन्तस्स्थितं परपरं महतो महान्तं
स स्यान्महानिति यजुःकठशाखयोक्तम् ॥ ९ ॥

तत्तुं भवाम्बुनिधिमम्बुरुहाक्ष दिव्ये
चक्राम्बुजे तव शुभे निजबाहुमूले ।
पूर्वे तु बिभ्रति तनावितराणि ताव-
ल्लिंगानि चैकमृचि बाष्कलसंहितायाम् ॥१०॥

चक्रं दधन्निजभुजा युगळेन तीव्र-
मेनो धुनोति मनुजो जलजेन साकम् ।

यत्सर्वदा परमहांसि लघूकरोति
तद्भूरिधाम बिभृयादिति याजुषी गीः ।। ११ ।।

श्येनान्वयशशकुनिरीशविभूतिभूतः
धृत्वायुधानि नृहरेरभवच्चमूषत् ।
एवं भवाम्बुधिगतो दधदायुधानि
तीर्णोऽभवत्यृचि च सामनि गीतमेवम् ।। १२ ।।

ये तेऽप्युरुक्रमसदायुधलाञ्छिताङ्गाः
विष्णोः पदं तदुपयान्ति ततो वयश्च ।
अस्त्राण्युरुक्रमजुषो[1] दधतो भवामो
दिव्ये पदे सुललिता इति तुर्यवेदः ।। १३ ।।

चक्रं बिभर्ति वपुषा मनजोऽग्नितप्तं
यः स्वस्सदा बलकरं स तु नाकमेति ।
धूत्वाऽखिलानि दुरितानि वितृष्णगम्यं
यत्स्यादृगागमखिलाभिहितोऽयमर्थः ।। १४ ।।

अग्निः पवित्रमनलो दशशत्यरोऽसौ
नेमिस्त्वनेन परितप्ततनुः परस्य ।
सायुज्यमेति भजतेऽपि सलोकभावं
साम्नोपगीतमिममर्थमुदाहरन्ति ।। १५ ।।

विश्वास्तनूरधिपतेर्जगतां पवित्र
पर्येषि सन्ततनतप्ततनूस्तदामः ।

1. ...रुक्रमवतो

नाप्नोति तद्दशशतारभृतो भजेयु-
स्तद्ब्रह्म बोधविमला इति वाक्त्रयीषु ॥ १६॥

यत्कान्तिधाम चरणं विततं पवित्रं
येनांकितस्तरति कर्म दुरन्तपारम् ।
शुद्धेन तेन दुरितानि विलंघयाम
पूता मुकुन्दभजनादरभंजनानि ॥ १७ ॥

लोकस्य साधनमुदच्चर(च्चिर)नल्पदीप्ति
भूरिप्रकाशममृतस्य झरीं दुहानम् ।
राजत्पवित्रमतुलं सुखितां दधातु
लोकेषु नः प्रथितकाठकगीतिरेवम् ॥ १८ ॥

शाण्डिल्यभाषितमिदं बिभृयुः पुमांसः
चक्रं सशंखमपि तेन सवारिजेन ।
त्यक्त्वासनं सशयनं पशुपुत्रकादीन्
कुर्याद्गृहोपकरणानि च लाञ्छितानि ॥ १९ ॥

लक्ष्मीशचक्रपरिचिह्नितबाहुमूलैः
पुंभिर्विनान्तकनिदेशनिरासकोऽन्यः ।
को वा भविष्यति भुवीति विभाति विष्णु-
धर्मोत्तरे शमनकिङ्करवादशैली ॥ २० ॥

यस्याशये वसति विश्वभृदव्ययात्मा
तस्योत्तमस्य मनुजेषु सुदृष्टिपाते ।
तद्बाहुचक्रहतवीर्यबलस्य वासो
नार्हो ममापि तव चेति पराशरोक्तिः ॥ २१ ॥

मात्स्येऽपरत्र च निरूपितमेवमेव
मच्चक्रलाञ्छिततनुर्मयि रूढभक्तिः ।
यो दुर्लभो भुवि स मृत्युनिदेशरोधी
नाप्नोति भानुसुतभीषणभाषणानि ।। २२ ।।

अन्यालयोपगमनमन्यनमस्क्रियान्य-
वीक्षान्यसौधगमनानि[1] नरो न कुर्यात् ।
तिष्ठेन्मदायुधसमंकितबाहुमूलः
कौन्तेय भक्तिभरितो मयि विश्वरूपे ।। २३ ।।

चक्रादिधारणमिदं प्रकटीकरोति
सम्बन्धमैश्वरमितीव हि विष्णुतत्त्वे ।
ताटंकनूपुरमुखानि विभूषणानि
स्त्रीणां भवन्ति पतिदैवततावगत्यै ।। २४ ।।

वैकुण्ठभक्तजनतो निरयेशसेवा
बिभ्यत्यदःपरिभवो जगदत्ति विश्वम् ।
नैतावतापि समयेन मुरारिभक्त-
स्संदृश्यते नरकवर्त्मनि देव भूम्ना ।। २५ ।।

केचित्सुदर्शनसमंकितबाहुमूला
धन्येक्षणास्तनुभृतो विचरन्ति तत्र ।
स्वैरं सुपर्वतटिनीमुखपुण्यतीर्थ-
श्लाघाधियैवमितिहाससमुच्चयोक्तिः ।। २६ ।।

---

1. ...... पां च सन्दर्शनं परसुरस्य

वर्णाश्रमोचितविधौ विनिविष्टभावै-
श्चक्रांकितैर्मुखभुजोरुपदप्रसूतैः ।
शौरिस्समर्चयितुमर्हति सेवितुं च
व्यासो जगाविति हि पञ्चमनित्यवाण्याम् ॥२७॥

पाद्मं पुराणमिदमाह रमेशभक्तो
मर्त्यस्सुदर्शनदरे बिभृयात्स्वबाह्वोः ।
एवं भजन्मुरविरोधिनमाश्रयेत
स्यात्तस्य चक्रदरिणः परमेण साम्यम् ॥ २८ ॥

इत्याह भागवतमप्यविगीतमङ्के
चक्राङ्कितस्य जपहोमतपांसि दानम् ।
यत्नेन मज्जनमुखान्यपि संविदध्या-
दक्षय्यभूरिफलदाय्यखिलं तदेतत् ॥ २९ ॥

संवत्सरेण रचितं यदघं मनोवाक्-
चेष्टाभिरंकनसुदर्शनदर्शनेन ।
सर्वं विनश्यति न हि ज्वरदाहचोर-
वह्न्यादिभीतिरवनौ ससुदर्शनस्य ॥ ३० ॥

आग्नेयभाषितमिदं बिभृयान्मुरारेः
पञ्चायुधानि मनुजो हृदि मूर्ध्नि फाले ।
बाह्वोरसिं धनुरुदारगदां पवित्रं
शङ्खं क्रमेण भरितो जलजाक्षभक्त्या ॥ ३१ ॥

कृत्वा प्रतिष्ठितमथायुधमन्त्रभेदै-
र्मध्येऽनलं परिनिधाय विधाय चार्चाम् ।

कुर्यां नरोऽङ्कनमजायुधतोऽप्रमत्त-
स्स्यादेष तेन महितो मधुवैरिलोके ॥ ३२ ॥

आदित्यवामनवराहसमीरताक्ष्र्य-
स्कन्दाञ्चिते मुनिमतेऽपि पुराणजाले ।
अन्यत्र चैवमुदघोषि किमन्यजल्पै-
स्तत्वार्थनिर्णयविदेशिभिरीशदूष्यैः[1] ॥ ३३ ॥

ज्ञात्वा धृतोर्ध्वतिलकः परमेशितारं
ज्ञानक्रियाङ्कसमाधिसमीक्षणार्हम्[2] ।
मुच्येत साधु वृजिनै[3]रिह पुण्यपापै-
रित्थं महोपनिषदि स्फुटमभ्यधायि ॥ ३४ ॥

एवं धृतोर्ध्वतिलकः परमेशितारं
मर्त्यस्समर्चयति यः परया स्वभक्त्या ।
अर्घ्यादिभिः परमपूरुषसूक्तमन्त्रैः
गच्छेत्परेशमिति काठकभाषितोऽर्थः ॥ ३५ ॥

अर्चादिषु क्रतुतनोर्दधदूर्ध्वपुण्ड्र-
मित्यादिना तरणवन्ति कुलानि सप्त ।
कुर्याद्व्रजेत कमलापतिधाम दिव्य-
मित्यन्तमर्थमिममाह च भल्लशाखा ॥ ३६ ॥

तत्रैव पङ्कजविलोचनभिन्नदेव-
भक्तास्तदूर्ध्वतिलकं दधतो ललाटे ।

---

1. ...रीशबाणैः
2. ...समीक्षणीयम्
3. निबिडै-

त्यागे जपे च हवने च निरूढभावा
भद्रं भजेयुरिति कण्ठरवेण सूक्तम् ।। ३७ ।।

पादाकृतिर्मुरभिदः स्वहिताय मध्ये
सच्छिद्रमूर्ध्वतिलकं मनुजो दधाति ।
शौरिप्रियो भवति पुण्यनिधिस्स मुक्तिं
प्राप्नोत्यथर्वकरुणा परिवाह एवम् ।। ३८ ।।

कुर्यात्त्रिपुण्ड्रतिलकं न तु लीलयापि
स्नातश्शुचिर्यतमना ऋजुमूर्ध्वपुण्ड्रम् ।
कुर्यान्महीसुर इति स्फुटमग्निवेश्य-
गृह्ये न दर्पणरुचिः करवस्तुदृष्टौ ।। ३९ ।।

बोधायनोदितमिदं जपहोमपूजा-
दानादिकर्मसु भवन् प्रयतो द्विजन्मा ।
कुर्यादृजूर्ध्वतिलकं दिवसे परत्र
पूर्वत्र तेन शुचिरेव न चान्यथेति ।। ४० ।।

मात्स्ये त्रिपुण्ड्रधरणं विनिषिध्य पूजा
तस्याप्यनूर्ध्वतिलकं विहितं द्विजातेः ।
श्रीनारदीयमपि पुण्ड्रनिधानभेदा-
नाक्षिप्य तद्विषयनिर्णयमुज्जगाद ।। ४१ ।।

तस्मान्मृदा धवळया बिभृयात्सदोर्ध्व
पुण्ट्रं (ण्ड्रं) महीसुरमुखो मनुजोऽखिलोऽपि ।
फालादिमेष्ववयवेषु समन्त्रयोगं
कर्मस्वकृत्रिमवचः प्रमुखोदितेषु ।। ४२ ।।

घ्रातं च भुक्तमपि पीतमनेन लक्ष्म्या
जिघ्रन्त्यदन्ति च पिबन्ति पुरुप्रभावाः ।
तस्मान्मुरार्युपहृतं शुचि भक्षयेयुः
प्रेक्षाधिका इति महोपनिषत्प्रतीतिः ॥ ४३ ॥

वेदेन पञ्चमतया विदितेन सूक्तं
श्रीपाञ्चरात्रहृदयावगमा महान्तः ।
तत्प्रापणं भगवता परिभुक्तमग्र्य-
मश्नन्ति तस्य सदने महतो विविक्ते ॥ ४४ ॥

ध्यायन् हरिं हृदि निवेद्य समाहितोऽन्नं
तस्मै तदादृतमुपाहृतमङ्गुलीभिः ।
प्राणादिमन्त्रकरणं जुहुयाद्द्विजन्मा
व्यासार्यदिष्टनिगमादृतभारतीयम् ॥ ४५ ॥

बोधायनर्षिपरिभाषितविष्णुकल्पे-
ऽप्येवं मुकुन्दरसनादृतमोदनादि ।
प्राश्यं प्रदेयमपि दैवतमानिताय
श्रीवैष्णवोऽहमिति साधुजनाय वक्त्रे ॥ ४६ ॥

वाल्मीकिभाषणमिदं सपरिग्रहस्सन्
देवश्शुचिर्नियतधी रविवंशदीपः ।
अग्नौ जुहाव हविराज्यमजाय शिष्टं
प्राश्याधितल्पमवसत्स्वसमीहितार्थी ॥ ४७ ॥

व्यक्तं रहस्यनिगमो विवृणोति शौरि-
भुक्तोज्झितस्य विनियोजनमोदनादेः ।

सुस्थाय गुह्यनिगमे श्रुतिधर्मकृत्या(त्य)-
पूजापराय भगवत्कृतितत्परेभ्यः ।। ४८ ।।

किं भाषणैर्बहुभिरत्र मुरारिभक्त-
दिव्योदनाद्यदनकर्मणि सादराणि ।
जाग्रत्यनाविलमनीषमनीषिबृन्द-
श्लाघापदानि बहुलानि[च*] शासनानि ।।४९।।

इत्थं निदेशसरणिर्जगतां विनेतु-
स्तल्लक्ष्मणं विनतमेनमुदारधीरम् ।
चक्राङ्कनेन कुरु वैष्णवशब्दवाच्यं
कर्मेदमीप्सिततमं कमलाधिपस्य ।। ५० ।।

इति यतिपतिवाणीं दुग्धधारामुदारां
निगमहृदयसाराम्मौळिना चक्रवर्ती ।
दधदथ गुरुपादौ सन्नमन् तन्निदेशात्
सदनमनुजगाहे वत्सवंशाम्बुधीन्दुः ।। ५१ ।।

इति दासचरित्रे दशमस्सर्गः ।।
श्रीमते श्रीनिवासपरब्रह्मणे नमः ।।

## अथ एकादशस्सर्गः

चक्रवर्त्यथ महीसुरधुर्यो-
रङ्गलक्ष्मणमुनीन्द्रनिदेशात् ।
पञ्चसंस्कृतिविधं विधिवेदी
लक्ष्मणाय विनताय वितेने ॥ १ ॥

तापनाममनुपुण्ड्रसमर्चा-
रूपसंस्कृतिषु लक्ष्मणदासः ।
तापनामतिलकान् प्रतिपेदे
चक्रवर्तिन उदग्रविबोधात् ॥ २ ॥

भूसुराय गुरवेऽथ दुकूल-
क्षौमभूषणसुवर्णमणीभिः ।
अर्हणामकृतमोदपरीता-
मर्हते बहुळमूरुजसिंहः ॥ ३ ॥

लक्ष्मणो लसति चक्रदराभ्यां
बाहुमूलयुगळे विलसद्भ्याम् ।
संयमीन्द्रमणिरादरभारात्
चक्षुषैक्षत तमद्भुतभूमा(म्ना?) ॥ ४ ॥

देशिकेन्द्रपदपङ्कजवाटी-
नित्यसञ्चरणधन्यतमेन ।
तेन[1] भूरिदिवसानि समोदं
यापितानि भगवन्निरतेन ॥ ५ ॥

---

1. तत्र

कर्हिचित्स यतिशेखरपादौ
संप्रणम्य विहिताञ्जलिपद्मः ।
मन्त्रयागविधिभाजनमेनं
पश्यतेति सभयं निजगाद ।। ६ ।।

वेदयन्तमिति[1] तं गुरुधुर्यः
प्राह कालपरिणामविशेषः ।
यर्हि तर्हि तव सेत्स्यति सर्वं
श्रीनिवासकरुणापरिणाहात् ।। ७ ।।

सोऽन्वहं गुरुपदाम्बुजसेवी
मन्त्रयागविधितत्परचेताः ।
देशिकेन्द्रकरुणापरिरम्भं
लब्धुमैच्छदनघातुलशीलः ।। ८ ।।

उत्सुकं विनतमार्यकुलेन्द्रो
वीक्ष्य भावमपि कैटभहन्तुः ।
कालदैर्ध्यमपि संयमिधुर्य-
स्संदधारमनुमण्डलदित्साम् ।। ९ ।।

ख्यातिलाभविमुखः करुणार्द्र-
स्संयमीन्द्रमणिरागमसारम् ।
मन्त्रजालमददादतिगुह्यं
लक्ष्मणाय दमशान्तिधनाय ।। १० ।।

1. प्रार्थयन्तमिति

श्रीपतेरहमदः-पदपद्मे
दास्यमेव धनमेतदवाप्त्यै ।
संश्रयामि हरिमित्यमुमर्थं
मन्त्रमूलहृदयं स दिदेश ॥ ११ ॥

कर्म यन्नियतमस्ति विधेयं
पञ्चधा नियमिते पुरुषेण ।
तद्गुरुर्निखिलमप्यनवद्यं
लक्ष्मणाय निजगाद दयाळुः ॥ १२ ॥

उत्थितश्शयनतश्शुचिपाद-
स्सम्यगाचमनकर्म विधाय ।
सप्तधा हरिमुदीर्य कृतार्थ-
स्संस्मरेत् करिकृपाकरदेवम् ॥ ॥ १३ ॥

नैकजन्मकृतकर्मविपाकं
दुर्दमं समभिवीक्ष्य सतापः ।
उद्विजन् भव खिन्नमनस्क-
श्चिन्तयेत् प्रियहितं सविमर्शम् ॥ १४ ॥

मानिता न जननी पितृमुख्या
भाविता न गुरवस्सुकृतं वा ।
वीक्षिता न कमलेक्षणमूर्ति-
स्संतरेम दुरितानि कथं वा ॥ १५ ॥

प्राकृतैस्सुखलवैर्बहु सुख्यान्
मोहितोऽस्मि कथमुत्तरयामि ।

रोषभीषणकराळकृतान्त-
क्षीबभाषणविषोल्बणवीच्याम् ॥ १६ ॥

एवमारचितकर्मविपाक-
स्फूर्तिचिन्तनभवां समवस्थाम् ।
सन्तितीर्षुरथ सत्त्वसमुत्था-
माद्रियेत धृतिमीहितदोग्ध्रीम् ॥ १७ ॥

यद्गतं न खलु तत्र विमर्श-
स्साधनं भवति नैव समर्थम् ।
वाहिनीं गतजलां किमु कुर्यात्
दुर्विभेदघनसेतुनिबद्धाम्(न्धः) ॥ १८ ॥

नन्वितः परमहं वरिवस्यां
साधयामि पदयोर्मधुहन्तुः ।
इत्यवेक्ष्य कलयेज्जलजाक्षं
देशिकांश्च विमलाशयबोधान् ॥ १९ ॥

ब्रह्मवित्परिगृहीततटाक-
प्रेष्ठतीर्थकृतसाधनभारः ।
द्वित्रिबाणपतनान्निऋतृत्यां
देहशोधनविधिं विदधीत ॥ २० ॥

उत्सृजेदसवपर्णतृणाद्यै-
रास्तृतेऽवनितले स्वमलादीन् ।
सन्ध्ययोर्नृहरियक्षदिगास्यो
निश्युदीक्षितघटीतनयाशः ॥ २१ ॥

भस्मलोष्ठभसितोषरशैल-
श्वभ्रसिन्धुतटगोष्ठपदादौ ।
उत्सृजन् मलमधीशुचिवात-
स्त्वीद्विजन्ममुरहृद्गृहहश्वा ॥ २२ ॥

त्यक्तदैहिकमलश्शुचितायै
प्राप्य पल्वलजलं शुचि तीरम् ।
शासनं समनुसृत्य विदध्यात्
इष्टदृष्टफलशौचमतन्द्रः ॥ २३ ॥

शुद्धपाणिचरणश्शुचिदन्त-
स्सारसं महदुपात्तमवाप्य ।
स्नानकर्म विदधीत निदेशा-
न्माधवस्य हृदयाश्रितशौरिः ॥ २४ ॥

सन्निमज्य विधिपूर्वमथैवं
वाससी विपरिधाय पदार्द्रः ।
द्वादशोर्ध्वतिलकान् ऋजुमञ्जून्
मृत्स्नया धवळयैव विदध्यात् ॥ २५ ॥

फालभुव्यधिपतिं कमलायाः
केशवं प्रणतिकर्म विदध्यात् ।
भास्वरं द्वियुगचक्रविसर्प-
द्रोचिरुज्ज्वलचतुर्भुजहृद्यम् ॥ २६ ॥

प्रावृषेण्यघनवारिदनिर्यद्-
रोचिरुद्धतिनिराकृतिधुर्यम् ।

बाहुयुग्मयुगभासुरशङ्कं
भावयेज्जठरवर्तिनमीशम् ॥ २७ ॥

माधवं भुजचतुष्टयदीव्य-
द्रत्नमञ्जुळगदापरिभूषम् ।
चिन्तयेन्मणिकदम्बकनिर्य-
द्दीप्तिबान्धवमुरोमहनीयम् ॥ २८ ॥

संश्रयेत गळभूषणरत्नं
पूर्णिमोदितसुधांशुसगर्भ्यम् ।
श्रीपतिं चतुरुदग्रकराब्ज-
न्यस्तशार्ङ्गमरुणाम्बुरुहाक्षम् ॥ २९ ॥

पद्मकेसरचिरार्जितकीर्ति-
क्षोभदक्षरुचिरारुणिमानम् ।
आनमेज्जठरदक्षिणपार्श्वे
विष्णुमादृतचतुर्हलहस्तम् ॥ ३० ॥

प्रातरम्बुरुहडम्बरधुर्यं
संश्रयेत मधुसूदनमीशम् ।
दक्षिणे भुजतटे कृतगेहं
तं चतुर्मुसलभावितबाहुम् ॥ ३१ ॥

पादवारिरुहविक्रमलीला-
क्रान्तविश्वभुवनं निवसन्तम् ।
दक्षिणे गळतलेऽनलवर्णं
भावयेच्चतुरसिं जलजाक्षम् ॥ ३२ ॥

बालवारिरुहबन्धुसनाभि
वामकुक्षितलभावितगेहम् ।
वामनं रचयतान्मनसि स्वे
वज्रमण्डितभुजायुगयुग्मम् ।। ३३ ।।

पट्ट(ट्टि)सद्विियुगभूषितबाहु-
श्श्रीधरः श्रितमनोहरमूर्तिः ।
पुण्डरीकरुचिदुर्गमदीप्ति-
स्सव्यबाहुसदने वरणीयः ।। ३४ ।।

भोगिभोगपरिपन्थिभिरग्रचै-
र्बाहुभिर्विधृतमुद्गरशस्त्रम् ।
वामकण्ठसदनं करणेशं
चिन्तयेदचिरदीधितिदीप्तिम् ।। ३५ ।।

पञ्चभिः परिगतं निजशस्त्रै-
रर्चयेत्कमलनाभमनन्तम् ।
नैकतिग्मकरदीधितिचर्चा-
धुर्यमिष्टजघनोपरिनिष्ठम् ।। ३६ ।।

पाशभासुरचतुर्भुजदृश्यं
शक्रकोपनिभरोचिरुदग्रम् ।
दामकुक्षिमरुणाम्बुजनेत्रं
भावयेत्त्रिकनिकाय्यविहारम् ।। ३७ ।।

शारदेन्द्वयुतदीधितिनिर्यत्(द्)
गर्वसर्वधनमोचनधुर्यम् ।

व्यूहभेदविशदीकृतिमूलं
वासुदेवमनिशं कलयेत ॥ ३८ ॥

मन्त्रचिन्तनविधामनुकुर्व-
न्नेवमूर्ध्वतिलकान् दधदङ्गे ।
स्वोचितां भगवतो वरिवस्यां
तद्विदामपि नृणां विदधीत ॥ ३९ ॥

श्रीशमेवमभिगम्य कृतार्थ-
स्तत्समर्चनकृते कुसुमादीन् ।
आहरेद्वकुळभूषणगाथा
भावचिन्तनसुधोर्मिभिदां वा ॥ ४० ॥

पूतपाणिचरणोऽहनिमध्ये
देवमन्दिरसमीपमवाप्य ।
सन्नमेत्सपरिवारमनन्तं
श्रीनिकेतनमधो हृदि कुर्यात् ॥ ४१ ॥

श्रीनिवासशुभमञ्जुळहृद्य-
स्वच्छदिव्यवपुरीक्षणभूम्ना ।
मानसाविषयमोदभरार्द्रः
प्रारभेत मधुवैरि समर्चाम् ॥ ४२ ॥

सम्प्रदायसमुपागतमन्त्र-
स्वादुभावपरिचिन्तनपूर्वम् ।
आश्रयेन्मुरहरांघ्रिसरोजं
तत्समर्चनविरोधिनिवृत्त्यै ॥ ४३ ॥

एवमर्पितभरः करुणार्द्रः
स्वाम्यनुग्रहसुनिर्मलचित्तः ।
श्रीशविग्रहविचिन्तनहृद्य-
न्मोदवीचिकृतपूजनमीप्सेत् ॥ ४४ ॥

श्रीनिकेतनकटाक्षमहिम्ना
लब्धदिव्यतनुरारचयेत्ताम् ।
अर्हणां मुररिपोरनुरूपां
मानसापचितसंगतिहृद्याम् ॥ ४५ ॥

अर्घ्यपाद्यसलिलाचमनेभ्यः
स्नानकर्मनिखिलार्थजलाभ्याम् ।
भाजनानि परिकल्प्य यथावत्
पूरयेत् घटजलेन च तानि ॥ ४६ ॥

वस्तु यद्यदधिपाय रमाया
दीयते तदमलार्घ्यजलेन ।
प्रोक्ष्य मूलमनुना परतो वा
शोषणाद्युपहितं परिदद्यात् ॥ ४७ ॥

प्रार्थयेत कमनं कमलाया
भोगदानविधिषु प्रणताङ्गः ।
पश्य माधव गृहाण कुरुष्व
क्षान्तिमुद्वह मुदन्त्वमुनेति ॥ ४८ ॥

योगपीठमधितिष्ठति देवे
स्वामितामखिलकारणताञ्च ।

प्राप्य तामपि च साधनभावं
संस्मरेत्स्वमतिभूतनुताश्च ।। ४९ ।।

श्रीनिधे निखिलसद्गुणवार्धे
मानितांघ्रिजलजाब्जभवाद्यैः ।
यावदर्चनसमाप्तिदयाळो
सन्निधत्स्व भवुकेऽत्र शरीरे ।। ५० ।।

मान्त्रमासनमिदं मधुरोधिन्
अर्पितं परिगृह्णाण च पादू (दुम्) ।
आस्यतामिदमुदारगभीरै-
र्वीक्षणैर्जनमिमं परिपश्य ।। ५१ ।।

अर्घ्यपाद्यसलिलाचमनानि
स्वर्पितानि विनतेन गृहाण ।
अत्र मोदमुररीकुरु शौरे
शान्तिमावह विलोकय दृष्टया ।। ५२ ।।

लिंप गन्धमथ धारय पुष्पं
जिघ्र धूपमवलोकय दीपम् ।
नागवल्ल्युपहितानन्वासं
स्वीकुरुष्व कृपया नरकारे ।। ५३ ।।

स्नातुमासनमिदं जगदीश
श्रीपते समधितिष्ठ सुगन्धि ।
साधनानि निखिलान्यपि शौरे
संभृतानि कुरु मां तव दास्ये ।। ५४ ।।

पाद्यमाचमनमज्जनशाटयौ
पाद्यमाचमनपद्युगपीठे ।
दन्तकाष्टरसनालिखने ते
वस्त्रशुद्धिजलसेचनकानि ॥ ५५ ॥

सन्तु चाचमनदर्पणपाणि-
क्षाळनानि मुखवासफलानि ।
नागवल्ल्युपहितानि सतैला-
भ्यङ्गधात्र्यतुलगन्धजलानि ॥ ५६ ॥

दन्तकङ्कतमनन्त मुरारे
प्लोतदिव्यतनुशोधनशाटयौ ।
स्वीकुरुष्व रजनीकृतलेप-
क्षाळनानि कनकाम्बरयुग्मम् ॥ ५७ ॥

सूपवीतमपि पाद्यमथोप-
स्पृष्टिमीश्वर पवित्रमवेहि ।
गन्धपुष्पहृदयङ्गमधूप-
स्वाज्यदीपविमलाचमनानि ॥ ५८ ॥

नृत्तगीतयुतवाद्यविशेषै-
र्मज्जनं मधुरमीश रमायाः ।
स्वीकुरु त्रिदशनाथ हरे नी-
राजनाचमनशुद्धिपटानि ॥ ५९ ॥

प्लोतवस्त्रकनकाम्बरयुग्मे
कूर्चसारणमनन्त गृहाण ।

श्रीनिधे निखिललोकशरण्य-
स्वामिनेऽस्तु नमनं मम तुभ्यम् ।। ६० ।।

आसनं कमलनेत्र तृतीयं
तुभ्यमेतदुपनीतमतुल्यम् ।
भूषणस्रगनुलेपनवासः
छत्रचामरमुखावळिपूर्णम् ।। ६१ ।।

अर्घ्यपाद्यसलिलाचमनानि
श्लिष्टगन्धवसनद्वयभूषाः ।
सूपवीतयुगळाचमने च
स्वीकरोतु कृपया मयि देवः ।। ६२ ।।

दिव्यपुष्पनयानाञ्जनसम्यक्-
पुण्ड्रदर्पणसुधूपसुदीपाः ।
माधवाचमनदिव्यपताका-
च्छत्रचामरयुगानि च तुभ्यम् ।। ६३ ।।

शङ्खचिह्नमणिकाहळभेरी-
प्रेषवाद्यनिचयैरपि शौरे ।
मोदमावह सुनृत्तसुगीतैः
श्रीपतेऽपि च परैरुपचारैः ।। ६४ ।।

देशिकोपनतमन्त्रविशेषै-
रर्पितानि कुसुमानि मुरारे ।
स्वीकुरु प्रणमनानि समन्ता-
दाहितानि सपरिक्रमणानि ।। ६५ ।।

स्तौमि कर्णसुभगैरुपगीतै-
स्सूरिभिर्वकुळभूषणमुख्यैः ।
वाक्(ग्)भरैस्सरसिजाक्ष नतं मां
किङ्करं कुरु तवैव दयाळो ॥ ६६ ॥

शालितण्डुलकृतामपि मात्रां
सर्वभोगपरिपूरणधुर्याम् ।
वक्त्रवासफलनागलतादीन्
अर्घ्यमीश्वर गृहाण नमस्ते ॥ ६७ ॥

प्रापणावसरयुक्तमिदं ते
तुर्यमासनमुपागतमग्र्यम् ।
भक्ष्यभोज्यमुखवस्तुसमग्रं
प्राप्नुहीश जगतां नुत बन्धो ॥ ६८ ॥

पाद्यमाचमनमीश सुराणा-
मर्हणाम्बु च गृहाण दयार्द्रः ।
सर्पिरिक्षुमथ माक्षिकदुग्ध-
स्वादुदध्युपकृताचमने च ॥ ६९ ॥

गां सुवर्णमपि रत्नमनर्घं
स्वीकुरुष्व कृपया मधुहारिन् ।
विश्वसृष्ट्यवनसञ्चरहेतो
श्रीनिकेतनविभो करुणाब्धे ॥ ७० ॥

संस्कृतान्नदधिदुग्धमधूनि
व्यञ्जनानि फलमूलमुखानि ।

चोदितानि विधिनात्महितानि
स्वीकुरुष्व नयनेन मुरारे ॥ ७१ ॥

सत्यदूरमशुचिं बहुनीचं
मन्तुभाजनमनर्हमबोधम् ।
दुर्मतिं करुणया निजया तं
मामनादरणकर्म विधेहि ॥ ७२ ॥

विश्वदोषविधुरं गुणपूर्णं
स्वानुरूपपरिपूतसहार्दम् ।
नायिकोचितमिदं हविराद्यं
संविधेहि करुणाकर रस्यम् ॥ ७३ ॥

श्रीनिवास कृपया निरवद्यं
स्वीकुरुष्व हविराज्यनिषिक्तम् ।
अर्हणाम्बुपरिषेचनकृत्यै-
श्चानुपानमपि तर्पणयोगि ॥ ७४ ॥

वक्त्रशोधनजलाचमनीये
पाणिमार्जनमनुत्तमगन्धम् ।
वक्त्रवासफलनागलतादीन्
स्वीकरोतु भगवानखिलेशः ॥ ७५ ॥

कूर्चशोधितमनन्त मुरारे
मान्त्रमासनमिदं परिपूतम् ।
प्राप्नुहि(स्मि?) श्रितवितीर्णमुदग्रं
दासकर्मणि निधेहि नतं माम् ॥ ७६ ॥

पाद्यमाचमनयोगि च पुष्पं
धूपदीपविमलाचमनानि ।
वक्त्रवासफलनागलतादीन्
स्वीकुरु प्रणमनानि बहूनि ॥ ७७ ॥

पुण्डरीकदललोचन विष्णो
षड्गुणाढ्य करुणादिपयोधे ।
श्रीनिवास शयनासनमग्र्यं
स्वीकुरुष्व मृदुळीकृतगन्धि ॥ ७८ ॥

पाद्यमाचमनमीश्वर माला
भूषणानि मृदुळानि दुकूलम् ।
सूपवीतमपि चाचमनीयं
सन्त्विमानि करुणाकर तुभ्यम् ॥ ७९ ॥

चन्दनं कुसुमधूपसुदीपान्
अच्युताचमनमाननवासम् ।
नागवल्ल्युपचितं चरितार्थं
कुर्वमर्त्यकुलकोटिमणे त्वम् ॥ ८० ॥

कारिसूनुमुखसूरिसुवाणी-
दुग्धवीचिरसरस्यगुणं त्वाम् ।
स्तौम्यनन्तममलं घनमोदं
किङ्करोऽस्मि तव सर्वदशायाम् ॥ ८१ ॥

अर्चयेदिति रमापतिमीशं
भक्तिभारभरितो भुवि मर्त्यः ।

इत्युपादिशदमुं गुरुमर्थं
लक्ष्मणाय कृपया स मुनीन्द्रः ॥ ८२ ॥

सौमित्रिरित्थमुदितां गुरुशेखरेण
वाचं निशम्य मधुरां चरितार्थचित्तः ।
आचार्यधुर्यकरुणा परिणाह भूम्ना
स्वोत्तारणं परममन्यत कृत्यशेषम् ॥ ८३ ॥

इति दासचरित्रे एकादशस्सर्गः ॥

श्रीमते श्रीनिवासपरब्रह्मणे नमः ॥

श्रियै नमः ॥ श्रीरस्तु ॥ श्रीः ॥

## अथ द्वादशस्सर्गः

श्रीरङ्गलक्ष्मणमुनेररविन्दमुग्धौ
पादौ कदाचिदवनम्य स लक्ष्मणार्यः ।
पप्रच्छ सूरिकुलदिव्यसुधामुदारां
हृद्यां यतिक्षितिपदिव्यकथानुषङ्गात् ।। १ ।।

कारुण्यदुग्धपरिवाहमहाम्बुराशि-
र्दासाय देशिकमणिः प्लववर्षधाराः ।
पुण्या मुनिप्रभृतिसूरिकथा सुधाया
यत्पायिनामिह पुनर्जठरे न वासः ।। २ ।।

काञ्च्यां बिमुक्तिनगरीषु महत्तमायां
पुण्या स(त्स)रः कनकवारिरुहान्तराळात् ।
आविर्बभूव सरसीमुनिराश्विनाख्ये
मासे मुरार्युडुनि माधवपाञ्चजन्यः ।। ३ ।।

नीलोत्पलादजनि भूतमुनिर्गदात्मा
मासीषनाम्नि वसुदैवततारकायाम् ।
मल्लाभिधावति पुरे स्थलशायि नामा
यत्राविरास जगतामवनाय देवः ।। ४ ।।

आसीन्मयूरनगरे लतिकाहृदान्तात्
मास्याश्विने वरुणभाङ्कितारकायाम् ।
योगी महानभिधया कुमुदप्रसूना-
द्यं व्याहरन्ति भुवि नन्दकमायुधेन्द्रम् ।। ५ ।।

एतन्मुनित्रयमसीम्नि भवाम्बुराशौ
क: कीदृगित्यवमृशन्न चकार सङ्गम् ।
केनापि वारिरुहलोचनपादपद्म-
न्यस्तस्वरक्षणभरं विचचार मह्याम् ॥ ६ ॥

पद्मापतिर्जगदिदं परिपातुकामो
गीर्भिर्भवाम्बुनिधिनौभिरदस्त्रयस्य ।
वृष्ट्यात्मना जनितया त्रितयं मुनीनां
एकत्र सर्वशकन: कलयाञ्चकार ॥ ७ ॥

यद्देहळीभुवि मुनित्रयमास देव-
स्संघर्षणेन तदपीडयदन्तरात्मा ।
को मध्यतोऽस्त्यविदित: परिपीडयन्नो
वर्षानिलाहततनूनिति तज्जगाद ॥ ८ ॥

पुह्यामुनिस्तरणिदीपमुदाजहार
ज्ञानं प्रदीपमकरोदपि भूतयोगी ।
तेनेऽनुभूतिमितरो मुनि सार्वभौमो
व्यक्तीचकार मुरवैर्यपि विश्वरूपम् ॥ ९ ॥

योगित्रयी विशदशौर्यनुभूतिवेणी
भूम्ना प्रबन्धनिचयेन समर्च्य देवम् ।
श्रीशं मनोरथसमर्थनजातहर्ष
चित्ते निधाय विचचार पुरेव लोकान् ॥ १० ॥

तपस्यतो भार्गवसंयमीन्दो-
स्सुराङ्गनायामथ भक्तिसार: ।

सुदर्शनोऽभूत् कणिकृष्णदाता
पौषे मखायां क्षितिसारपुर्याम् ॥ ११ ॥

त्यक्तं पितृभ्यामपि भक्तिसारं
तदा महीसाररमानिवासः ।
निपीय दृग्भ्याममृतायिताभ्यां
ययौ स तेनाजनि हृष्टपुष्टः ॥ १२ ॥

अन्यानि सिद्धान्तकुलानि सोऽयं
दृष्ट्वावगाह्यावगतार्थतत्त्वः ।
निवेशयामास हृदीन्दिरेशं
तत्त्वं पदं वेदशिरः प्रदीपम् ॥ १३ ॥

तपोनिधिस्त्र्यक्षमुमासनाथं
वरं गृहाणेति मुदा वदन्तम् ।
सूचीपथं तन्तुरसौ प्रयातु
त्वद्वीक्षया नान्यहृदित्युवाच ॥ १४ ॥

इति ब्रुवन्तं कुपितस्त्रिणेत्रः
स्वफालनेत्रेण दिधक्षुरेनम् ।
अपश्यदुग्रं समहर्षं धुर्यो
ददर्श फालेक्षणमङ्घ्रिदृष्ट्या ॥ १५ ॥

तत्फालदृश्वन् (श्वा) हि विधूततेजा
मृढ(ड)स्तदानीमसि भक्तिसारः ।
विलोकयाक्ष्णा पदयोर्नतं मा-
मिति ब्रुवन् व्योमपथं प्रपेदे ॥ १६ ॥

तस्मिन् कदाचित् भृगुवंशचन्द्रे
रथ्यां गते व्याघ्रपुरो द्विजानाम् ।
शूद्रोऽयमित्यज्ञतया स तूष्णीं
कुर्वन्नधीतिं क्षितिदेवसंघः ।। १७ ।।

त्यक्तां शमज्ञानहतेन तेन
स स्मारयामास नखेन भिन्दन् ।
अपाण्डुरं व्रीहिरपारभूमा
तद्वीक्ष्य यज्ञे स तमुज्झितांशम् ।। १८ ।।

कु(क्र)तौ प्रवृत्ते हरिपादसेवी
शार्दूलपुर्यच्युतबोधितार्थः ।
आनाय्य तं यज्ञभुवं यमीन्द्रं
व्यधत्त तस्मै विधितस्सपर्याम् ।। १९ ।।

ऋत्विक्कुलं सोढुमपारयत्तां
विनिर्ययौ यज्ञभुवोत्यमर्षि ।
तद्भूमबोधाय रथाङ्गपाणि-
स्तदीडितोऽदर्शयदात्मरूपम् ।। २० ।।

भूमानमुद्वीक्ष्य मुनेरपार-
मृत्विक्कुलं तं प्रणनाम शान्तम् ।
सरोजनाभायतनं दिदृक्षु-
र्जगाम योगी निरवद्य धामा ।। २१ ।।

पाण्ड्यनीवृति पुरी कुरुकाख्या
द्वापरे कुरु महीपति भुक्ता ।

पूर्ववारिनिधिपश्चिमतीरे
राजते भुवनमण्डलभूषा ॥ २२ ॥

तत्र पादजशिखामणिरासीत्
भावितो वळुदिनाडिन नाम्ना ।
माधवाङ्घ्रिसरसीरुहसेवा
दुग्धवीचिरससंभृतचेताः ॥ २३ ॥

आत्मभूरजनि धर्मधराख्य-
स्तस्य भव्यगुणरत्नपयोधिः ।
सार्थयन्नयनधूननकृत्या
धर्मसेत्ववनतः स्वसमाख्याम् ॥ २४ ॥

चक्रपाणिरजनिष्ट तनूज-
स्तस्य माधवपदाम्बुजभृङ्गः ।
रत्नधामपदभाषितमाहु-
र्यस्य सूनुमुपमानविदूरम् ॥ २५ ॥

सूनुना सुमतिना स च रेजे
पाटलाक्षगुरुणा सुभगेन ।
पाटलस्तनुभवं प्रतिपेदे
काञ्चनोपपदकार्यभिधानम् ॥ २६ ॥

तिष्यदुर्लसितधिक्कृतिधुर्य-
कारिरित्यभिधया भुवि गीतम् ।
पद्मनाभकरुणा परिवीतं
पाटलाक्षजनुषस्सुतमाहुः ॥ २७ ॥

इन्दिरोल्लसदुरस्कतनूजां
वृत्तशीलसुभगां मधुराङ्गीम् ।
कामिनीमुदवहत्कमलाक्षीं
नाथनामकलितामपि कारी ॥ २८ ॥

सा पुनः पितृगृहादुपयान्ती
तं कुरङ्गपतिमम्बुजनाभम् ।
सम्प्रणम्य चकमे तनुजातं
तत्कृपाभरितवीक्षणभूम्ना ॥ २९ ॥

तन्मनोरथमुदीक्ष्य मुरारि-
र्वाहिनीपतिमुवाच गभीरम् ।
कारिसूरिमहिळात्मजता ते
काममस्तु मम कांक्षितमेवम् ॥ ३० ॥

सांख्यसौगतमुखादृततत्त्-
द्दर्शनक्षुभितमागममौळिम् ।
त्रातुमागतमुवाह चमूपं
कुक्षितस्तदनु कारिमृगाक्षी ॥ ३१ ॥

सत्यसौष्ट[1] तनयं हरिणाक्षी
तिष्यलाभदिवसे वृषमासे ।
इन्द्रवल्ल्यनुमतोऽजनि रामं
कोसलेन्द्रदुहितेव कुमारम् ॥ ३२ ॥

1. प्राक्षविष्ट

आववौ सुरभिळः पवमानो
मानसं विमलमास मुनीनाम् ।
आबभुः प्रसदनेन दिगन्ताः
पुष्पवृष्टिरपतत्सुरसृष्टा ॥ ३३ ॥

सूतिकासदनमाप्य मुरारि-
स्सन्मतिं व्यतरदात्मवतेऽस्मै ।
सैन्यपोदयमवेक्ष्य विनिद्र-
स्तिन्त्रिणीतरुरभूदुरगेन्द्रः ॥ ३४ ॥

अर्भको हरिसमेधितबोधो
नापिबत्कुचपयो न रुरोद ।
ओदनं न चकमे न बबाधे
क्षुन्मुखं दुरितमद्भुतबालम् ॥ ३५ ॥

द्वादशेऽहनि सुतं सवितारौ
लोकवृत्तिविधुरं समवेक्ष्य ।
मारनित्यवदतां द्रविडोक्त्या
वाहिनीपरिबृढावररूपम् ॥ ३६ ॥

कारिसूनुरतुलामलदिव्य-
ज्ञानवारिनिधिरादृतमौनः ।
अम्लभूरुहमुपागमदार्य-
स्सूरयो यमहिराजमुशन्ति ॥ ३७ ॥

कारिभूरनवलोक्य सदृक्षं
मौन्यनूनमतिरच्युतदृष्ट्या ।

हायनाष्टयुगमास्त समाध्यौ
वारिजेक्षणसदानुभवेन ॥ ३८ ॥

द्वापरे हरिकथावति कोळू-
र्पत्तने मधुरकव्यभिधानः ।
वासवोडुनि[1] मधौ कुमुदांशः
प्रादुरास पुरतश्शिखसूनुः ॥ ३९ ॥

आलयावळिमवाप्य मुरारे-
स्तीर्थजालमवगाह्य कवीन्द्रः ।
सञ्चरन् भुवि कदाचिदपश्यत्
कुम्भसूनुदिशि धामयुतार्कम् ॥ ४० ॥

आगतो मधुरगीरपि सूरि-
स्तन्महः प्रणिपतन् कुरुकायाम् ।
देशिकोऽस्तु मम तत्त्वहितार्थी
वक्तुमेतदिति काममस्त ॥ ४१ ॥

कारिसूनुरपि योगजमत्या
भक्तमागतमवेक्ष्य समाधिम् ।
सन्निवर्त्य भगवत्परतुष्टया
तं ददर्श करुणावृतदृष्टया ॥ ४२ ॥

स्वानुभूतिपरिवाहमयं तत्
स्वप्रबन्धनिकुरुम्बमतानीत् ।
कारिजेन मुनिना कमलाक्षो
यत्त्रयीहृदयबोधनधुर्यम् ॥ ४३ ॥

---

1. read त्वाष्ट्रकोडुनि

ईदृशानुपमसूक्तितरङ्गैः
सांख्ययोगजिनहैतुकसंघाः ।
ये च वेदविपरीतपदव्यां
सन्ति तेऽपि विधुताः स्वयमेव ॥ ४४ ॥

एवमद्भुतवचोभरभूम्ना
दूरधूतपरदर्शनजालम् ।
कारिजं परसृणिं शठकोपं
प्रावदन् कृतिकुलानि महान्ति ॥ ४५ ॥

तत्त्वसाधनपुमर्थकथाभि-
र्वाक्सुधाभिरमलाभिरुदारः ।
प्रीणयन् मधुरवाङ्मुनिधुर्यं
कारिभूरपि मुदं समवाप ॥ ४६ ॥

देशिकान्न परमस्ति जगत्यां
सर्वथेति मधुरः कविरार्यम् ।
अस्तुतामलगभीरवचोभि-
र्योगिनं शठनिराकृतिधुर्यम् ॥ ४७ ॥

श्रीपराङ्कुशमुनीन्द्रसपर्या
मोदमानहृदयादिमनाथः ।
मालिकां वकुळपुष्पनिबद्धां
दिव्यगन्धमधुरां विततार ॥ ४८ ॥

कारिजो वकुळभूषणनाम्ना
कौस्तुभेन मणिनेव मुरारिः ।

पञ्चपञ्चशरदो दश रेजे
भावयन् कमललोचनमाद्यम् ॥ ४९ ॥

आस्ते पुरी कुक्कुटकूटनाम्ना
ख्यातावनौ केरळदिव्यभूषा ।
यं पालयामास दृढव्रताख्यो
महीपतिर्माधवपादसेवी ॥ ५० ॥

तस्मिन्पुरे चेरकुलाम्बुधीन्दो-
र्दृढव्रतात् भूमिपतेर्बभूव ।
माखा(घा)दितेयोडुनि कौस्तुभात्मा
महानुभावः कुलशेखरार्यः ॥ ५१ ॥

श्रुत्वैकदा यातुबलेन जन्य-
मेकस्य साकेतपतेर्महीन्द्रः ।
साह्याय सास्त्रःप्रयियासुरासी-
ज्जयश्श्रुतेश्शान्तरयो बभूव ॥ ५२ ॥

महीपतिर्भागवतैकदेवो
व्यधत्त दौवारिकरोधदूरान् ।
महात्मनो भागवतान् सतीर्थ-
मचूचुरत् कोऽपि नरेन्द्रभूषाम् ॥ ५३ ॥

अनार्यमेतन्मनुजेन केन
व्यधायि कर्मेति विचिन्त्य सत्सु ।
तद्धौरिकः शंकितचोरकर्मा
राज्ञे च भावं निजमाचचक्षे ॥ ५४ ॥

विश्वासभूम्ना महतां सुवृत्ते
भूपस्समानाय्य घटं सनागम् ।
महत्सु नेदं वृजिनं शपेह-
मिति ब्रुवन् पाणिमधत्त तस्मिन् ।। ५५ ।।

भक्तिं समुद्वीक्ष्य सतां समाजे
सविस्मयः कुण्डभुजङ्गमोऽपि ।
महीभुजे मौळिमणिप्रभाभि-
र्नीराजनामारचयन्निवाभात् ।। ५६ ।।

विनिर्ममे राघववासुदेव-
श्रीवासरङ्गेन्दुयशोमनोज्ञम् ।
प्रबन्धमिन्द्रो महतां नरेन्द्रः
पुराणवाणी शिखरोपलाल्यम् ।। ५७ ।।

एवं स दिव्याकृतशीलवृत्तो
हरौ तदीयेष्वपि रूढभक्तिः ।
निधाय राज्यं तनुजे शिषेवे
दिव्यालयानम्बुजलोचनस्य ।। ५८ ।।

व्यङ्क्तुं परत्वमतुलं सरसीरुहाक्षः
श्रीधन्विनूतनपुरे पुरतश्शिखस्य ।
शुक्रे समीरणहितोडुनि वैनतेयं
सूनुं व्यधत्त यमुशन्ति हि भट्टनाथम् ।। ५९ ।।

आनर्च देवं वटपत्तनाथं
श्रीविष्णुचित्तोऽनुदिनं प्रसूनैः ।

आरामतः स्वेन कृताद्युपात्तै-
यथा सुदामा यदुवंशचन्द्रम् ॥ ६० ॥

पाण्ड्याधिपो वल्लभदेवनामा
नृपो नगर्यां मधुराभिधायाम् ।
चरन् कदाचिन्निशि भूसुरेण
केनाप्यभूत् बोधिततत्त्वसारः ॥ ६१ ॥

तत्त्वं परं केन भवेत् सुबोधं
वदेति निर्विण्णमना महीपः ।
पुरोधसं प्राह स तत्त्वबोधे
शुल्कच्छिदामाह परं प्रमाणम् ॥ ६२ ॥

विनिस्सृतायामिति किंवदन्त्यां
विपश्चितां संहतिराजगाम ।
श्रीविष्णुचित्तोऽपि दधन्निवेशं
मधुद्विषोगान्मधुरापुरीं ताम् ॥ ६३ ॥

स्वं दर्शनं[1] व्यक्तमुदीरयत्सु
विद्वत्सु शुल्कं न पपात शीर्णम् ।
श्रीभट्टनाथे वदति स्वतत्त्वं
तत्पादमूले निपपात शुल्कम् ॥ ६४ ॥

मत्वा परं श्रीपतिमेव तत्त्वं
महीपतिर्विष्णुमनःकृतीन्द्रम् ।

---

1. स्वं स्वं मतं

रथ्यासु तस्यां पुरि वारणेन
सञ्चारयामास स नृत्तगीतम् ।। ६५ ।।

आरूढ ताक्ष्यौं दिवि दम्पती तौ
जगत्पती तस्य शुभं चिकीर्षू ।
प्रकाशयामासतुरात्मरूपं
श्रीभट्टनाथाय जगत्पवित्रम् ।। ६६ ।।

दिव्यौ तदा लोकपती समीक्ष्य
तुष्टाव भक्त्यानिद(ग)मादिवाचाम् ।
रूपान्तरैर्दिव्यवचोभिरग्र्यैः
प्रबन्धरूपैरपि विष्णुचित्तः ।। ६७ ।।

महीभुजे तत्त्वहिते पुमर्थं
प्रदर्श्य सूरिर्विनतातनूजः ।
आगत्य सद्म स्वमसीमभूमा
पुरेव दास्यं कुसुमैश्चकार ।। ६८ ।।

शुचौ सफल्गुन्युडुनि प्रसूतां
तुळस्यरण्यान्तरतो धरण्याम् ।
ददर्श बालामबलां सुरूपां
विसिष्मिये चापि सतां प्रधानम्(नः) ।। ६९ ।।

यामाहुरार्यां धरणीं यदुक्तिः
प्रबन्धरूपेण जगत्पुनाति ।
यां भट्टनाथः प्रददौ समोदं
श्रीरङ्गधाम्ने विसदृङ्महिम्ने ।। ७० ।।

पञ्चोत्तराशीतिसमा महात्मा
तत्तादृशात्यद्भुतबोधभूमिः ।
आराधयन् स्वं वटपत्रनाथं
प्रसूनदास्यैरनयद्दिनानि ॥ ७१ ॥

बभूव मण्डंगुडि नाम्नि धाम्नि
भक्ताङ्घ्रिरेणुर्वनमालिकांशः ।
ज्येष्ठोडुनि स्वादुनि चापमासे
यं विप्रनारायणमाहुरार्याः ॥ ७२ ॥

निदेशतो रङ्गनिधेर्द्विजन्मा
प्रसूनमालाभिरलञ्चकार ।
तमेव नैस्पृह्यनिधिर्महात्मा
स्वनिर्मितोद्यानसमाहृताभिः ॥ ७३ ॥

तस्मिन्निरीक्ष्याच्युतभक्तभक्ति
तत्त्वावबोधोपगतामतुल्याम् ।
भक्ताङ्घ्रिरेणुं कथयाम्बभूवुः
विपश्चितो रङ्गपुरीधुरीणाः ॥ ७४ ॥

कदाचनानेन तमोनुभावं
प्रदर्शयन् रङ्गमणिर्जनेभ्यः ।
दास्योपकल्प्यां सह देवदेव्या
संयोजयामास पुरश्शिखेन्द्रम् ॥ ७५ ॥

प्रियाशयादाननितान्तखिन्नं
तं हर्षयन् रङ्गमणिर्द्विजन्मा ।

भवन्नदात् रुक्ममयं स्वपात्रं
तस्यै ततस्सा विजहार तेन ॥ ७६ ॥

अथाधिरङ्गं जनता नियन्त्री
विचित्य सर्वत्र सुवर्णपात्रम् ।
तद्दैवदेव्या सदने समीक्ष्य
रुषाधिका तामपि निर्बबन्ध ॥ ७७ ॥

श्रीविप्रनारायणसूरितुष्ट्यै
त(म)द्भाजनं रौक्ममदायि तस्यै ।
न किञ्चिदप्यत्र विधेयमस्मै
जगाद चैवं जनतां स रङ्गी ॥ ७८ ॥

वाणीमुपश्रुत्य मुरारिदत्तां
सभाजयन्ती जनता द्विजेन्द्रम् ।
ययौ [तदा*] रङ्गपतेरुदीक्ष्य
गतोपमं संश्रितवत्सलत्वम् ॥ ७९ ॥

भक्ताङ्घ्रिरेणुः कृतनिष्कृतिस्सन्
आराधयन् रङ्गविधुं प्रसूनैः ।
स्तुवन् प्रबन्धेन विबोधगाथा-
मुखेन तं प्राक्षिपदात्मकालम् ॥ ८० ॥

श्रीवत्सलक्ष्माजनि पाणनाथ-
स्सस्यान्तराळात् निचुळानगर्याम् ।
ऊर्जे विरिञ्चोडुनि दैत्यधाम्नः
स्तम्भादिवाद्यः पुरुषो नृसिंहः[1] ॥ ८१ ॥

---

1. पुरुषः पुराणः

अनात्मजौ कौचन दम्पती तं
विलोक्य बालं तरसा गृहीत्वा ।
संवर्धयामासतुरादरार्द्रौ
गव्येन दुग्धेन परं न चान्यैः ॥ ८२ ॥

अनाविलोऽप्यन्त्यकुले विवृद्धया
सोमामनुल्लङ्घ्य मरुद्वृधायाम् ।
स्थितः कराभ्यां कलयन् विपञ्चीं
जगौ गुणान् रङ्गपतेरपारान् ॥ ८३ ॥

जगत्पती गानसुधां पिबन्तौ
तौ दम्पती पाणमुनेरपूर्वाम् ।
स्वकन्धरायां विनिवेश्य पाणं
समानयेत्यूचतुरात्मभक्तम् ॥ ८४ ॥

स लोकसारङ्गमुनिस्तदानीं
यथा निदेशं गुणगानलोलम् ।
पाणं समानीय गळेन हृष्टो
निवेशयामास पुरो मुरारेः ॥ ८५ ॥

पाणोऽपि गाथादशकेन देवं
रङ्गाधिपं सुन्दरदिव्यदेहम् ।
आपादचूडं परिपीय चित्तं
ददन्महृद्धयोऽन्तरधान्महात्मा ॥ ८६ ॥

परिरम्भपुरान्तिकोज्ज्वले
नगरे कार्तिककृत्तिकोडुनि ।

उदभूद्विधुचापवैभवः
परकालः कृतिनीलपादजात् ॥ ८७ ॥

युवराजपदे निवेशित-
स्स तु चोळक्षितिपेन सादरम् ।
सचिवैस्सह वैरिधूननात्
परकालः प्रथितो महीतले ॥ ८८ ॥

स च गन्धपुरीदुरन्धरा-
दतुलादादृतपञ्चसंस्कृतिः ।
अधिनागपुरं सरोभवा-
मुपयेमे कुमुदादिवल्लरीम् ॥ ८९ ॥

स तदा कमलाक्षदैवतान्
वरिवस्या करणेन तोषयन् ।
विदधे धनसंचयव्ययं
न तदैच्छत्किल चोळभूपतिः ॥ ९० ॥

नरपालनिदेशधूर्वहान्
स भटानाकलयन् भयद्रुतान् ।
सबलं नृपमागतं पुन-
र्व्यदधादात्मभटानुकारिणम् ॥ ९१ ॥

स तदानुनयैर्महीपति-
र्निजमानाय्य पुरं परान्तकम् ।
क्व च नाम रसघ्ननिन्यया-
दुपरोधेन कराप्रदानतः ॥ ९२ ॥

कमलापतिभक्तिसेवया
रहितोऽसौ परभिद्दिनत्रयम् ।
उपवासमचीकरत्सदा
सुतरां खिन्नमतिस्तदालये ।। ९३ ।।

करिशैलमणिः परच्छिदं
करदानेन विमोचयन्नमुम् ।
अवदन्निजसद्मसंगतं
निधिमानीय नृपाय देहि तम् ।। ९४ ।।

उदितां करिशैलशेवधे-
र्गिरमाकर्ण्य परान्तको गतः ।
करिशैलमुपानयन्निधिं
प्रददौ तेन बलिं महीक्षिते ।। ९५ ।।

नृपतिर्महिमानमीदृशं
परकालस्य निरीक्ष्य तद्वशे ।
विततान तदर्पितं धनं
भगवद्भक्तसमर्हणेच्छया ।। ९६ ।।

स तु भागवतार्हणादर-
व्ययिताशेषधनोऽसतां धनैः ।
अकरोदनुवासरं सतां
परिचर्यां खलकर्मणा हृतैः ।। ९७ ।।

अवितुं जगदम्बुजेक्षणः
परकालेन कदाचिदाययौ ।

पथि तस्य स रुक्मभूषणो
मनुजः स्वानुचरैर्धनाधिकैः ॥ ९८ ॥

परभित्पथि तं महाधनं
सगणं वीक्ष्य चतुर्भिरावृतः ।
अपहृत्य वसूनि भूतले
मणिपेटीनिहितानि तान्यधात् ॥ ९९ ॥

अथ गन्तुमनाः स्वपेटिकां
समुपादाय स मन्त्रिसंवृतः ।
सगणं मनुजं वचोऽब्रवीत्
गुरुपेटीनयनाक्षमो रुषा ॥ १०० ॥

किमिदं वद पेटिकोत्थिति-
प्रतिहत्यै विधृतो मनुस्त्वया ।
विशदीकुरु तन्न चेदहं
प्रहरामीति स खड्गमाददे ॥ १०१ ॥

कमलानिलयः कृपाम्बुराशिः
प्रददावष्टलिपिं मनुं स तस्मै ।
अदसीय निगूढभावभेदान्
प्रकटीकर्तुमनास्तदीयसूक्त्या ॥ १०२ ॥

उदितामलदिव्यबोधभूमिः
प्रबबन्ध प्रथमानशौरिवृत्तान् ।
स चतुर्विधकाव्यरीतिबन्धान्
अमृतासारतरङ्गितान्प्रबन्धान् ॥ १०३ ॥

परकालमुनिः प्रबन्धभेदै-
रुपदिष्टाखिलतत्त्वसाधनार्थः ।
अवनौ शरदां शतं न्यवात्सी-
दधिकं पञ्चभिरार्यशीलवृत्तः ॥ १०४ ॥

इति दासचरित्रे द्वादशस्सर्गः ॥

श्रीमते श्रीनिवासपरब्रह्मणे नमः ॥

## अथ त्रयोदशस्सर्गः

तुण्डीराह्वयवति मण्डले[1] प्रतीता
पुर्यस्ति स्वविभवसत्रपद्युलोका[2] ।
या भूताह्वयपरिकर्मिता सुरम्या
दुर्वादिद्विरदमृगेन्द्रसूरिसान्द्रा ॥ १ ॥

यत्रास्ते जगदवनं विधातुकामो
लक्ष्मीशः परिगतकेशवाभिधानः ।
नित्योद्यत्क्रतुवरधूमगन्धसेवा
निर्धूताखिलदुरितद्विजावलीढे ॥ २ ॥

तत्रासीदवनिसुरेन्दुरग्रजन्मा
हारीतान्वयमणिरद्भुतावबोधः ।
यत्कीर्तिर्लुठति दिगन्तरेषु मुग्धा
यद्बोधः प्रभवति केशवाभिधानात् ॥ ३ ॥

आर्द्रायामजनि मधौ मुरारिशय्या
भोगीन्द्रो मधुरिपुशासनं दधानः ।
आसूर्यन्वयभवकेशवार्यसूरेः
पूर्वस्या दिश इव पुण्डरीकबन्धुः ॥ ४ ॥

जातेष्टयामतनुत केशवार्ययज्वा
जन्माह्ने तनुजमणेरमन्ददीप्तेः ।
गोपृथ्वीकनकदुकूलधान्यमुख्यै-
रामोदं निरुपममग्रजावळीनाम् ॥ ५ ॥

---

1. तुण्डीरे द्युतिमति मण्डले
2. पुर्यास्ते निजबिभवात् त्रपद्युलोका

दृष्ट्वाभां शिशुवदनाम्बुजेऽसदृक्षां
दास्यश्रीसुललितलक्ष्मणार्यनाम्ना ।
आचख्यौ तमथ महाद्रिपूर्णसूरि-
र्हारीतोभ्युचिततया तथानुमेने ॥ ६ ॥

अन्नप्राशनमथ चौळकर्म वैधं
कृत्वाथोपनयनमष्टवत्सरस्य ।
हारीतस्तदनु जनुषस्त्रयीं सहाङ्गै-
राचख्यौ स च विबभावधीतवेदः ॥ ७ ॥

गार्हस्थ्यं तदनु गुरुस्समाललम्बे
शास्त्राणामपि पदवीषु जाङ्घिकोऽभूत् ।
श्रीकाञ्च्यामभजत यादवप्रकाशं
वक्तारं गुरुतरपूर्वपक्षकक्ष्याः ॥ ८ ॥

आर्यं तं पठनरतं निशम्य सूरि-
र्गोविन्दो यतिनिकटादवाप्य काञ्चीम् ।
आरेभे पठितुमिति स्थिते कदाचि-
द्यत्यर्थं निगमविरोधिनं जगाद ॥ ९ ॥

श्रुत्वार्थं यतिगदितं स लक्ष्मणार्यः
प्रत्यूचे यतिमिह ते घटेत नार्थः ।
यद्येवं गुणपरनैकनित्यवाणी-
व्याकोपो मनुमुखवाक्प्रतीपता च ॥ १० ॥

'कप्यास' श्रुतिविवृतिं यतौ विरूपां
कुर्वाणे गुरुरमना मुमोच बाष्पम् ।

यत्पूरं तददहदग्नितोऽपि चण्डं
तैलाक्तो यतिरपि तं ददर्श रुष्टः ।। ११ ।।

अम्भोजं तरणिविकासि यद्वदेवं
तन्नेत्रे इति हृदयं समुद्गिरन्त्याः ।
भारत्यास्त्वदुपनिबद्धया विवृत्त्या
खिद्यामीत्यथ यतयेऽवत(द)न्नियोक्त्रे ।। १२ ।।

मत्वा तं स्वसमयधूननावतारं
गूढात्मा स बहिरुपात्ततीर्थयात्रः ।
प्रस्थायाधिविपिनमार्यमन्यसक्तं
स त्यक्त्वा पठितृकुलैर्जगाम गङ्गाम् ।। १३ ।।

को वास्मिन्नवितुमिमं जनं विभुस्स्यात्
कान्तारे करिगिरिधूर्वहादृतेऽन्यः ।
इत्यार्ये विमृशति भिल्लदम्पती ता-
वायातौ विपिनतलं (नु?) तीर्थभानुम् ।। १४ ।।

अप्राक्षीत् गुरुरवलोक्य तावरण्ये
कुत्रत्यौ क्व जिगमिषेति साद्यबुद्धिः ।
ऊचाते निजनगरीं कृतीन्द्र काञ्चीं
गच्छावो(मो) भयविधुरः त्वमेहि यावः(मः) ।।

गच्छन्तौ महति वनान्तरे तदा तौ
स्विन्नाङ्गौ सलिलकृतादरौ निशम्य ।
कूपोदं तुलितसुधं प्रदाय ताभ्या-
मन्वेतौ नयनपथातिगौ ददर्श ।। १६ ।।

किन्वेतत् क्व सहचरौ मदन्तरङ्गौ
नूनं तौ भुवनपती गजाद्रिकान्तौ ।
इत्यार्यः प्रतिदिनमानयन् विविक्तं
कूपोदं मुदमनयद्द्विपादिबन्धुम् ॥ १७ ॥

जाह्नव्यां यतिरवगाह्य मोहसृत्या
गोविन्दं हरनिरतं विधाय काञ्चीम् ।
आगच्छन् गुरुमवलोक्य भव्यवृत्तं
संहृष्टः पुनरपि पाठयाञ्चकार ॥ १८ ॥

भूमानं गुरुतिलकस्य यामुनार्यः
श्रुत्वा तं नयनपथे विधातुकामः ।
आगत्य द्विरदगिरावुपास्य देवं
दृष्ट्वार्यं पुनरपि रङ्गमेव भेजे ॥ १९ ॥

काञ्चीन्दुक्षितिपतिसूनुभूतधूत्यां[1]
सन्नद्धे यतिनि तदग्रतो निरस्ते ।
वाङ्मात्रादवनिपभूपिशाचभेदी
भूमानं गुरुतिलकः स्फुटीचकार ॥ २० ॥

आदेशं गुरुरुपलभ्य यामुनेया-
न्नत्वाङ्घ्रिं नतवरदस्य रङ्गमेत्य ।
श्रुत्वार्यं स्वपदगतं नितान्तखिन्नो
दिव्यं तच्चरममसेवतांगमार्यम् ॥ २१ ॥

1. ............पतिसुतापिशाचधून्वा

आभुग्नाङ्गुळि समुदीक्ष्य यामुनाङ्गं
तत्रत्ये कथयति भावमार्यबृन्दे ।
एवं स्यादिति कथयन्नवाप्य काञ्चीं
कूपोदाहृतिमतनोदसौ पुरेव[1] ॥ २२ ॥

श्रीकाञ्चीमुनिमभिगम्य लक्ष्मणार्यो
मय्यार्यस्सहृदयमीक्षणं वितन्वन् ।
भव्यं मे वरदगिरा त्वयाभिधेयं
भावेऽस्मिन्[2] प्रभवसि सर्वथेत्युवाच ॥ २३ ॥

प्राहास्मै स परमतत्त्वमस्मि सोऽहं
कैवल्यं तनुविगमे हिता प्रवृत्तिः ।
नापेक्षा चरमधियो मतं सभेदं
पूर्णार्यो गुरुरिति देवराजवाणीम् ॥ २४ ॥

सुश्राव स्वसमयरक्षणैकदृष्टैः
काञ्चीन्दोस्समुदितमर्थषट्कमार्यः ।
श्रीकाञ्चीमुनितिलकाद्द्विपाद्रिधामा
सल्लापं रचयति येन योगधाम्ना ॥ २५ ॥

श्रीकाञ्चीमुनिवचनेन लक्ष्मणार्यः
पूर्णार्यं निजगुरुतापदं निनीषुः ।
प्रस्थायाधिसरणि तं गुरुं प्रपेदे
भूदेवादृतमधुरान्तकाग्रहारे ॥ २६ ॥

---

1. कूपोदानयनमचीकरत्पुरेव
2. कृत्येऽस्मिन्

पूर्णार्यो रघुवरधाम्नि तत्र दिव्ये
सूरीन्द्रं वकुळमहीरुहादधस्तात् ।
व्यातानीदरिदरभव्यबाहुमूलं
प्रावोचन्मनुमपि सार्थकं द्वयाख्यम् ॥ २७ ॥

पूर्णार्यैस्सह गुरुरञ्जसाऽऽप्य काञ्चीं
सूत्रार्थं शठरिपुभाषितादृतेऽन्याः ।
सूक्तीरप्यधरितदुग्धमाधुरीकाः
पूर्णेभ्यः समधिजगाम देशिकेभ्यः ॥ २८ ॥

प्रस्थाप्य प्रसवितुरालयं वधूं स्वां
केनापि स्वविमतकर्मणा मुनीन्द्रः ।
आचार्यस्तदनु महादयाधिनेतु-
र्लक्ष्मीशादभजत चाश्रमं तुरीयम् ॥ २९ ॥

काषायाम्बरमधुरं धृतत्रिदण्डं
सूरीन्दुं कृतशिखमादृतोपवीतम् ।
उद्वीक्ष्य द्विरदगिरीन्दुराह नाम्ना
राजानं भुवि यतिनामसीमभूम्ना ॥ ३० ॥

तत्तादृग्विभवमुदीक्ष्य संयमीन्द्रं
तं माता तनयमुवाच यादवाख्यम् ।
योगीन्द्रं तनुज भजेत्यमुत्र काले
वाणी काप्यभवदनङ्गका तथेति ॥ ३१ ॥

अध्वायं निगमहितश्शुचीतरोऽहं
पूतस्स्यामवनि परिक्रमेण तस्य ।

नानेहेत्यभिमृशतेऽवदन्मुकुन्दो
योगीन्दोः परिगतिरेव निष्क्रियेति ।। ३२ ।।

ज्ञातार्थस्स यतिपतिप्रदक्षिणेन
क्षिप्तागामहितमशिश्रयत्तमेव ।
तं योगी सदरिदराङ्कितं समन्त्रं
कारुण्यादकृत शिखात्रिदण्डहृद्यम् ।। ३३ ।।

धृत्वाज्ञां यतिनृपतौ सतामवाप्य
श्रीरङ्गं प्रणमति रङ्गधामबन्धुम् ।
रक्षास्मद्विभवयुगीमसीमसीमां
मत्स्वामीत्यपि च तमाह रङ्गधुर्यः ।। ३४ ।।

गोविन्दो यदुतनयप्रलोभितात्मा
पूर्णार्यविगतपुमर्थतत्त्वसारः ।
सिद्धान्तं स्वमभजतेति वाचमार्यैः
श्रुत्वाऽसौ मुदमतुलामवाप योगी ।। ३५ ।।

पूर्णार्यानुमतिमवाप्य गोष्ठ्यधीशात्
पूर्णार्यादभजत मूलमन्त्रसारम्[1] ।
गीतार्थोदितमनुभावमप्यनूनं
गोष्ठीपुर्यधिप मुरारिसंप्रणुन्नात् ।। ३६ ।।

आचार्याभिमतनिराकृतावपीयं
छात्राणां ततिरविता भवेदितीव ।

---

1. ..................मन्त्रभावं

मन्त्रार्थप्रकटनकारिणं यतीन्द्रं
नाथं नो मतमिदमाहुरेतदीयम् ।। ३७ ।।

श्रीसूक्तीर्वकुळधरस्य रङ्गनायी:
श्रीमालाधरगुरुराह भावमासाम् ।
श्रीरामायणमपि शैलपूर्णसूरिः
श्रीरामानुजमुनये गुणार्णवाय ।। ३८ ।।

जित्वेन्द्रं कथककुलस्य यज्ञमूर्ति
सत्तर्कैर्दशभिरहोभिरष्ठभिश्च ।
योगीन्द्रस्तमकृत सारिशङ्खचिह्नं
काषायाकलितकटिं कृतत्रिदण्डम्[1] ।। ३९ ।।

वेदार्थग्रहमकृतागमान्तसारं
व्यातानीद्यतिपतिरागमान्तदीपम् ।
श्रीभाष्यं यदुकुलचन्द्रगीतभाष्यं
गम्यानां त्रितयमथाततान नित्यम् ।। ४० ।।

वाक्पीठं गतवति भूपतौ यतीनां
जित्वाऽस्मिन् कुमतिकुलं धनेशदिश्यम् ।
वाणी तत्कृतिमवलोक्य सूत्रटीकां
श्रीभाष्यं गुरुमपि तत्कृतं जगाद ।। ४१ ।।

सौमित्रिर्दिशि दिशि वावदूकजालं
वाग्जालैर्जयति तदक्षमाभिचारे ।

---

1. ...कलितनुं त्रिदण्डहृद्यम्

तत्पीडां विदधति तान् गृहीतपादान्
कारुण्यादकृत सुदर्शनाब्जबाहान् ॥ ४२ ॥

कूरेशात्मजमकरोत्पराशराख्यं
सूत्राणां विवृतिमनुत्तमां चकार ।
चित्पुत्रं वकुळधराह्वयं वितेने
तत्पूर्णं व्यतनुत यामुनार्यभावम् ॥ ४३ ॥

निर्बन्धं मुनिरसहन् स शोळजन्यं
पाश्चात्यं विषयमवाप्य वावदूकान् ।
जित्वा तान् दशशतवक्त्रतामिवाप्त-
स्सन्नम्रानकृत विशिष्य शिष्यकुल्यान् ॥ ४४ ॥

डिल्लीतस्समुपहरन् स लक्ष्म्यधीशं
श्रीनारायणपुरि यादवादिधाम्नि ।
संस्थाप्यानुपमविसीमभूमभूमिः
सामोदं विनतकुलेन तत्र रेजे ॥ ४५ ॥

चोळोऽपि स्वमतमुदीक्ष्य कम्पमानं
कूरेशात् क्वचन विलिख्य पत्रिकायाम् ।
नो दैवं शिवपरमित्यमुं भटाय
प्रायच्छत् विबुधकराक्षराङ्कनाय ॥ ४६ ॥

यातायां दिशि दिशि तस्य पत्रिकायां
ये केचिन्नृपतिभिया दुरक्षराणि ।

कूरेन्दुः स्थिरमतिरक्षराणि चक्रे
द्रोणं स्यात्परमिति तत्र गाढबाधम् ॥ ४७ ॥

श्रुत्वैवं नृपतिरमर्षणो वितेने
कूरेशं नयनविहीनमार्यरोधी ।
चोळोऽपि क्षितिमभजत्परेतभर्तुः
कृम्याळी शिथिलगळस्तदात्व एव ॥ ४८ ॥

तामेतां गिरमुपकर्ण्य संयमीन्द्रः
कूरेशालयमधिगम्य यादवाद्रेः ।
दृष्ट्वैनं नहि घटते तवैतदेवं
पृष्ट्वा तं निजसदनं ततो जगाहे ॥ ४९ ॥

आक्रान्ते कुमतिकुलेन चित्रकूटे
गोविन्दं वृषगिरिपादमानयित्वा ।
संस्थाप्य प्रबलतमे गृहे सकान्तं
पुद्धार्यादिममुनिमण्डितं तुतोष ॥ ५० ॥

स द्वैतामलतमदर्शनप्रसृत्यै
स्वच्छात्रेष्वकृत वरासनाधिनाथान् ।
सप्तत्या चतुरितया युतान् कृतीन्द्रान्
यद्भूमा वचनमनोऽतिभूमिरास्ते ॥ ५१ ॥

सद्वृत्तैः स्वसमयदूर्वहैर्महद्भि-
र्विद्वद्भिः कुमतिकृतानुवारिवाहैः ।

स्वच्छात्मैरवितमुरारिभूतियुग्मो
योगीन्दुः प्रथितयशा रराज मह्याम् ॥ ५२ ॥

स रङ्गरामावरजार्यपादै-
रुदीरितां सूरिकथां निशम्य ।
प्रहर्षपाथोधिसुधातरङ्ग-
निमग्नचेताः स्वममंस्त धन्यम् ॥ ५३ ॥

इति दासचरित्रे त्रयोदशस्सर्गः ॥

॥ शुभमस्तु ॥

## अथ चतुर्दशस्सर्गः

अथ गुरुतिलकं प्रणम्य दासो
वकुळमनोहरसूरिदिव्यसूक्तीः ।
प्रतिदिवसमधीत्य वाग्विधेया
व्यतनुत संयमिसार्वभौमदृष्ट्या ॥ १ ॥

प्रथमदशशतीमथ द्वितीयां
तदनु तृतीयसहस्रमादरेण ।
निजगुरुमुखतोऽधिगत्य कृत्स्नं
स्वहृदयरंगसलास्यमाततान ॥ २ ॥

तदनु धृतमतिस्तदर्थबोधे
स गुरुशिखामणिमानतो ययाचे ।
मयि घनकरुणा दिशन्तु भावं
वकुळधरादिमदिव्यभारतीनाम् ॥ ३ ॥

चिरपरिचयतो गृहीतशील-
स्समुचितपात्रमुदीक्ष्य लक्ष्मणाख्यम् ।
शठरिपुमुखसूरिसूक्तिभावं
समुपदिदेश गुरुर्नताय तस्मै ॥ ४ ॥

मुनिवरकरुणातरंगभूम्ना
समधिगतद्रमिडागमान्तसारः ।
इति हृदि कलयाञ्चकार दासः
प्रकृतिविपाकविहारमुद्दिधीर्षुः ॥ ५ ॥

क्वचिदहमभवं पतङ्गकीट-
द्विरदतुरङ्गवराहपुण्डरीकाः ।
मृगफणिमृगराजवायसाद्याः
हितविधिदूरतराश्शरीरभाजः ॥ ६ ॥

बहुलजननसिद्धपुण्यपाका-
दिह मनुजेषु ममोद्भवो बभूव ।
यमखिलपुरुषार्थसाधनार्हं
वदति कुलं विदुषां भवाब्धिपो तम् ॥ ७ ॥

मुरहरपदपद्मदास्यराज्य-
क्षमतममानुषदेहभाजनेन ।
न यदि कुशलमाद्रियेत युक्तं
भुवि न परो मदभागधेयभूमिः ॥ ८ ॥

सुनिपुणमतिना नृणां विधेया
विशरणशीलशरीरसङ्गतेन ।
झटिति भवपयोधिलंघनार्था
कृतिरिदमेव हि जन्मनः फलं स्यात् ॥ ९ ॥

इति मनसि निधाय भावबन्धं
यतिनृपतिं प्रणिपत्य वाचमूचे ।
शरणवरणमातनोतु मह्यं
गुरुरिति संसृतिधूननप्रभावम् ॥ १० ॥

वचनमुपनिशम्य लक्ष्मणोत्थं
गुरुरवदन्मुनिरंगलक्ष्मणार्यः ।

इदमपि विदितं त्वदीप्सितार्थे
  व्रजनगरीतिलको विभुः प्रमाणम् ।। ११ ।।

गुरुकुलतिलकोदितं स शृण्वन्
  किमिदमहो बत दृष्टवैपरीत्यम् ।
कथमिव स घटेत मे पुमर्थो
  हृदि कलयन्निति सव्यथोऽवतस्थे ।। १२ ।।

अथ स गुरुमणीरितं चिकीर्षुः
  स्थलशयदेवपुरीं यियासुरार्यम् ।
कमपि पथि विलोक्य तत्पदाब्जे
  नतिविततीर्विरचय्य संजहर्ष ।। १३ ।।

यमखिलविबुधालिवन्द्यपादं
  निखिलविशुद्धकलाविहारभूमिम् ।
शमदमशुचितादिसद्गुणाब्धिं
  वदति ततिर्महतां सतामपीन्द्रम् ।। १४ ।।

चतुरकृतवचश्शतक्रतुभ्यां
  यदभिजनस्य महिष्ठता पदाभ्याम् ।
यमिकुलमणिनाथयामुनेय-
  प्रभृतिमहत्तमजन्म यस्य वंशे ।। १५ ।।

इह जननवतां यदीयपादौ
  शरणतया विदितौ यशो यदीयम् ।
विशदयति दिशो दशाविशुद्धा
  हयवदनापरविग्रहं यमाहुः ।। १६ ।।

अभजत महतां पतिं यमार्यं
दुरितकुलापहमण्णयार्यसंज्ञा ।
दिनकरकुलकोटिरप्यदाक्ष्यं
वहति यदीयमहो निदर्शनांशे ॥ १७ ॥

पदकमलनतं विनीतरूपं
भयधृतिमोदभरं स लक्ष्मणार्यम् ।
अवददपि शुभं गुरुस्त्वदीयः
स्वपदनतानपि पाति सूक्तिसारैः ॥ १८ ॥

स निगदितमिदमाकलय्य कर्णे
सनमनमाह महत्कृपाभरेण ।
निखिलमविकलं तथापि सन्त-
श्शरणव्रतिः परमत्र शिष्यते मे ॥ १९ ॥

किमिति न कृतमार्यमौळिना ते
प्रपदनमग्र्यमथापि कारयामि ।
इति फणितिमुदाहरन् कृतीन्दुः
कमपि जगाद हिताय लक्ष्मणस्य ॥ २० ॥

वसति हि भवतां पदाब्जमूले
चिरतरमेष परीक्षितोऽपि शीलात् ।
गुरुपदरतिरप्यतो विधेयं
प्रपदनमित्यभिधेहि संयमीन्द्रम् ॥ २१ ॥

इति कथितमुदारमार्यवर्यै-
र्हृदि दधताग्रभवेन लक्ष्मणाख्यः ।

स्थलशयनगरीमगात्प्रतीतः
नतिततिमाकलयन् सतां पदाब्जे ॥ २२ ॥

निजगुरुपदपद्मषट्पदेन
स्फुटयति रूपधरेण सत्तमेन ।
स्थलशयनविभुं नमन्नुपागात्
पुनरपि तेन च तेन देहळीशम् ॥ २३ ॥

अथ गुरुमभिगम्य लक्ष्मणाख्ये
नमति महीत्रिदशो नमन् यतीन्दुम् ।
कृतिकुलतिलकाण्णयार्यभाव-
प्रकटनशौण्डमुवाच तं निदेशम् ॥ २४ ॥

गुरुरपि भवितास्य कांक्षितार्थो
महदभिमानपदं यदेष जातः ।
इति हृदयमुदाहरन् गभीरं
सहृदयमक्षिपथे चकार दासम् ॥ २५ ॥

अथ यतिनृपतौ कदाचिदार्ये
शयनमुपेयुषि देहळीशितातम् ।
अलमलमतिशंकयास्य शीले
मम भरमाकलयामुमित्यफा(भा)णीत् ॥ २६ ॥

व्रजपुरनिधिभाषितं स नैशं
हृदि दधदद्भुतवारिराशिमग्नः ।
अमनुत विनतं मुरारिवीक्षा-
पदमपि सत्करुणाविलासगेहम् ॥ २७ ॥

अकथयदिदमानतं मुनीन्द्र-
स्तव भविता करुणा रमालयस्य ।
न भवति विफला सतां मनीषा
कथनमिदं च न देहळीमुरारेः ।। २८ ।।

व्रजपुरकमितुः पदारविन्दे
गुरुतिलकेन निचिक्षिपेऽनघेन ।
गुरुतरकृतिसार्वभौमसेवा-
धुतदुरितस्य नतस्य गुप्तिभारः ।। २९ ।।

तदनु स विरराज गुप्तिभारं
भगवति गोपपतौ समाददाने ।
प्रतिदिनसहमोदतन्यमानो-
पवनसमाहृतपुष्परस्यदास्यः ।। ३० ।।

पतिमथ कृतिभिर्निशम्य पूतं
गुरुपदसंश्रयणेन दासजाया ।
स्वयमपि भवितुं तथैव बुद्धिं
व्यतनुत नैकजनुर्भवदैवपाकात् ।। ३१ ।।

गृहपशुकनकाम्बरस्वमित्र-
प्रमुखमुदीक्ष्य विनश्वरं सदुक्त्या ।
व्रजपुरमगमत्स्वभर्तृपार्श्व-
स्थितिरुचितेति धृताशयाबला सा ।। ३२ ।।

स्वसविधमवलम्ब्य वर्तमाना-
मपि गृहिणीं चकमे न लक्ष्मणार्यः ।

उपरतिधनलाभधूतलोको
न हि तनुते हृदि दुर्गतं धनेन ॥ ३३ ॥

पतिमतिमवलोक्य सा विषण्णा
प्रतिदिवसं गुरुसिंहपर्णशालाम् ।
नतिपदमतनोत्स्वभक्तिसेवा-
पहृदुरितावलिधूननैकबुद्धिः ॥ ३४ ॥

अतनुत व्रजबन्धुधाम लिप्तं
निरवकरं नवरंगवल्युपेतम् ।
मुरहरवरपादपद्मयुग्म-
प्रणमनसक्तमतिस्तृतीयवामा ॥ ३५ ॥

सहृदयमियमाकलय्य सेवां
पदकमलस्य सतां व्रजेशितुश्च ।
गुरुमणिदळधाम संप्रणामं
व्यतनुत तां गुरुरैक्षतार्यदृष्ट्या ॥ ३६ ॥

इयमनुदिनमेत्य पर्णशालां
नमति महत्सु हरौ च भक्तिमस्याः ।
विशदयति कृतिश्च कस्य केयं
कुत इति दासमपृच्छदार्यमिश्रः ॥ ३७ ॥

वचनमनुनिशम्य संयमीन्दो-
स्तमवददात्मवधूः स्वसाहचर्ये ।
कृतिमतिरनघार्यपादसेवा
परमधनादरधीरियं महान्तः ॥ ३८ ॥

पतिपरवशतोचिता तवेति
प्रशमनिधिः प्रशशास संयमीन्द्रः ।। ४४ ।।

निजगुरुकरुणावनिस्वजाया
सकलविधास्वपि वृत्तिषु स्वकासु ।
नियमनमवलम्ब्य संयमीन्दोः
रघुतनयावरजेन सन्यधायि ।। ४५ ।।

अथ गुरुमगमत्स रंगसंज्ञं
व्रजनगरी सविधस्थमग्रहारम् ।
अनुययितुरिमौ च दम्पती तौ
गुरुपदवारिरुहैकदैवतौ तम् ।। ४६ ।।

अधिवसति गुरौ चिराय रंगं
रघुतनुजावरजस्सहैव पत्न्या ।
गुरुसदनपरिक्रमप्रणाम-
प्रभृतिभिरेव निनाय वासराणि ।। ४७ ।।

गुरुकुलमणिना परिग्रहस्य
प्रपदनकर्म स कारयन् कदाचित् ।
पदकमलयुगं नमन्मुनीन्दो-
र्वचनमिदं निजगाद लक्ष्मणार्यः ।। ४८ ।।

इयमतुलमहत्कटाक्षपात्रं
भवतु चिराय धृताशयात्मगुप्त्यै ।
न हि गुरुचरणांघ्रिणा विनान्यत्
भवतरणौपयिकं तनोति चित्ते ।। ४९ ।।

पतिपरवशतोचिता तवेति
  प्रशमनिधिः प्रशशास संयमीन्द्रः ।। ४४ ।।

निजगुरुकरुणावनिस्वजाया
  सकलविधास्वपि वृत्तिषु स्वकासु ।
नियमनमवलम्ब्य संयमीन्दोः
  रघुतनयावरजेन सन्यधायि ।। ४५ ।।

अथ गुरुमगमत्स रंगसंज्ञं
  व्रजनगरी सविधस्थमग्रहारम् ।
अनुययितुरिमौ च दम्पती तौ
  गुरुपदवारिरुहैकदैवतौ तम् ।। ४६ ।।

अधिवसति गुरौ चिराय रंगं
  रघुतनुजावरजस्सहैव पत्न्या ।
गुरुसदनपरिक्रमप्रणाम-
  प्रभृतिभिरेव निनाय वासराणि ।। ४७ ।।

गुरुकुलमणिना परिग्रहस्य
  प्रपदनकर्म स कारयन् कदाचित् ।
पदकमलयुगं नमन्मुनीन्दो-
  र्वचनमिदं निजगाद लक्ष्मणार्यः ।। ४८ ।।

इयमतुलमहत्कटाक्षपात्रं
  भवतु चिराय धृताशयात्मगुप्त्यै ।
न हि गुरुचरणांघ्रिणा विनान्यत्
  भवतरणौपयिकं तनोति चित्ते ।। ४९ ।।

भवति तव मनीषितं मुरारि-
घंटयति सर्वमपीप्सितं नतेभ्यः ।
न शुभकृदयते कदाप्यभव्यं
रघुतनयावरजेत्युवाच योगी ॥ ५० ॥

यतिकुलतिलको विदेहजाता
वनभरमार्पिपदे रमाधिपस्य[1] ।
चरणजलजयोर्यमाहुरार्या
धरणिपरिष्कृतिरंगधामबन्धुम् ॥ ५१ ॥

गुरुवरपदपङ्कजं प्रणम्य
प्रणयभरेण कृतञ्जलिर्नता सा ।
मधुरविमलपादतीर्थसेवा-
समधिगतात्मसमर्पणा बभूव ॥ ५२ ॥

स च रघुतनयानुजो यतीन्दुः
प्रसृमरदृष्टिसुधातरंगसिक्ताम् ।
अमनुत विधुरां जरामृतिभ्या-
मपुनरुपस्क्रियमाणविग्रहां ताम् ॥ ५३ ॥

लक्ष्मणः प्रतिदिनं सकळत्रो
रंगलक्ष्मणगुरोः पदपद्मे[2] ।
अन्वमंस्त नतिकर्म वितन्वन्
दैवतं न परमात्मनिषेव्यम् ॥ ५४ ॥

1. रमाधवस्य
2. पदपद्मम्

वीक्ष्य देशिकपदाम्बुजभक्तिं
कान्तया रघुसुतावरजस्य ।
सत्कुलं प्रणिजगाद तमेतं
नूनमेष मधुरः कविरेव ॥ ५५ ॥

पारतन्त्र्यमुपमानविदूरं
तस्य दर्शयितुमत्र यतीन्दुः ।
आदिदेश मधुजिन्निलयानां
शेषवृत्तिमपि भागवतानाम् ॥ ५६ ॥

आदेशं यतिनृपतेरुदूह्य मूर्ध्ना
सौमित्रिर्विधृतमतिर्गुरोर्निदेशे ।
पूर्वेषु व्यतनुत कैटभप्रहर्तुः
स्थानेषु स्वशकनसम्मतां सपर्याम् ॥ ५७ ॥

इति दासचरित्रे चतुर्दशस्सर्गः ॥
श्रीमते रघुनन्दनपरब्रह्मणे नमः ॥

## अथ पञ्चदशस्सर्गः

रामानुजो गुरुनिदर्शितया पदव्या
संप्रीणयन् गुरुततिं स्मृतिपापहन्त्रीम् ।
दास्यानि यानि च मुरारिमुदे वितेने
विश्वानि विश्वविदितानि तनोमि तानि ।। १ ।।

यत्स्वावभासमददाद्व्रजपुर्यधीशो
मह्यं दयापरवशो मुनिसार्वभौमः ।
तस्यावभासनमनुत्तममित्यमुष्मै
दीपोपचायमतुलं विततान दासः ।। २ ।।

दास्येषु शासितुरिदं परमं हि येषां
सौरभ्यमुग्धकुसुमस्रगलङ्क्रियेति ।
दिव्यं प्रसूनवननिर्मितकर्म तेने
श्रीदेहळीशकरुणालहरीं प्रवित्सुः[1] ।। ३ ।।

श्रीमत्यहीन्द्रनगरे विबुधाधिनाथं
संप्रीणयंश्च कवितार्किकपञ्चवक्त्रम् ।
मुद्गोदनेन चणमाषमयेन चास्य
रामानुजोऽपचितिमारचयान्ततान(बभूव) ।। ४ ।।

तस्मिन् पुरे निगममौळिगुरोर्मनोज्ञे
सद्मन्यपारमहिमार्णवसूरिवन्द्ये ।
चक्रे सदीपपरिरोपणकर्म नित्यं
युक्तं हि शेषविषये विनतस्य दास्यम् ।। ५ ।।

---

1. For विविक्षुः

ज्ञानाधिकामलमहद्युतमग्रहारं
श्रीरंगसंज्ञमतुलं भजतो यतीन्दोः ।
मूर्ध्ना दधन्नियमनं स मुदा वितेने
पूषोडुरङ्गनिधिजन्मनि मौद्गमन्नम् ।। ६ ।।

श्रीभाष्यकृन्मुनिमनूत्तमदानभूमौ
मान्ये पुरेऽपि मधुरान्तकशब्दभाजि ।
रामानुजार्यमुनिधूर्वहजन्मतारा-
दिव्योत्सवं स विदधे स्वदमानशीलः ।। ७ ।।

श्रीशैलभासुरसदन्वयिचक्रवर्ती(र्त्ति)-
दिव्यान्ववायवरदीपमहन्निवासे ।
लक्ष्मीपुरे समवतारजुषं वदन्ति
श्रीरङ्गलक्ष्मणमुनिं गुरुसार्वभौमम् ।। ८ ।।

तत्राग्रहारतिलके निगमान्तसूरिः
स्वीयानुकम्पिहृदयः परिगृह्य रूपम् ।
सौन्दर्यभूमसदनं विनतार्तिहारि-
क्षेमावहं मृगदृशां मुदमातनोति ।। ९ ।।

आनर्च तं निगममौळिगुरुं स्वतन्त्रं
तन्त्रेषु विश्वविविधेषु स लक्ष्मणार्यः ।
भाद्रोत्सवेन महितेन मुरारिदैव-
तारा महोद्धवशिखेन बुधाश्चितेन ।। १० ।।

यच्छासनानि गुरुमेव वदन्ति दैवं
विद्यां परामपि धनं परमां गतिं च ।

नारायणोऽवति निमग्नमिमं भवाब्धौ
लोकं गुरूत्तमतनुं परिरभ्य दिव्या(म्) ॥ ११ ॥

प्राणान् शरीरमपि च द्रविणं स्वकीयं
कुर्यान्नरो महितदेशिकसाद्विशङ्कम्[1] ।
तद्दास्यमेव परमं शरणं न तस्मा-
दन्येन मुक्तिफणितिर्विहितेत्युशन्ति ॥ १२ ॥

भूमौ गुरोरपि गृहे तनये कळत्रे
कोशादिवस्तुषु परेषु च तन्मतेषु ।
छात्रो भवेत्सबहुमानमना निकामं
य(त)न्नाम चेष्टितगुणेष्विति चोद्गिरन्ति ॥१३ ॥

तस्मान्मयापि गुरुजन्मतले विधेयं
दास्यं स्वरूपसुभगं समुदेति दासः ।
लक्ष्मीपुरालयमहत्कुलमाननीयं
सेतुं व्यधत्त महतो जलवारणस्य ॥ १४ ॥

जाने न देवमपरं कुरुकापुरीश-
दासोऽहमित्यभिहितं प्रसमीक्ष्य सूरेः ।
रामानुजो निखिलदैवतमौळिमान्ये
रङ्गे गुरोरकृत मञ्जुळपर्णशालाम् ॥ १५ ॥

श्रीव्योमपुर्यधिपपुष्करणीविधाने
सोपानपंक्तिदृषदा स ततान साह्यम् ।

1. महितदेशिकपादपद्मे

पुर्यां हि यत्र भगवानरविन्दनाभः
स्वादूक्ति सर्वमपि सैन्धवगन्धदूरम् ॥ १६ ॥

श्रीशौरिराजमभिनन्दयति स्म देवं
पद्माकराम्बुजसदापरिरम्भधन्यम् ।
रौक्मप्रसूनमणिनिर्मितमञ्जुळेन
माल्येन नैजरुचिधूततमःकुलेन ॥ १७ ॥

काष्णौ(र्ष्णो)पुरे स निगमान्तविचेयमाद्य-
मद्यापि वारिधिसुताभरणं महीयः ।
तेजःपरं परिचचार युगं समाया-
स्सूनार्पणानतिपुरीक्रमणादिभिश्च[1] ॥ १८ ॥

दिव्ये पदे कलशघोणपदाभिधेये
श्रीशार्ङ्गपाणिमशरण्यशरस्य(ण्य)मीशम् ।
आराधनं व्यतनुतामलदीपधृत्या
संवत्सरौ स निपुणश्चरितार्थयन् स्वम् ॥ १९ ॥

तद्दिव्यदेशनिलया निखिलामहान्तो
रामानुजं समवलोक्य मुकुन्ददास्यम् ।
अन्यादृशं तदिदमित्यवदन् प्रमोदा-
न्मान्यं हि शार्ङ्गशयभागवताभिधानम् ॥ २० ॥

काञ्च्यां सदीपरुचिदैवतमद्वितीयं
पद्मालया सहचरन् प्रणमन् कदाचित् ।

1. तेजःपरं परिचचार सुमार्पणेन
नत्या परिक्रमणतोऽपि समायुगळ्याम् ॥

तद्दिव्यमन्दिरदृढीकृतिबद्धबुद्धि-
स्तेने गुरूत्तमगिरानुपमं प्रयत्नम् ॥ २१ ॥

चक्रे हिमोपवननेतुरुदग्रदीप्तिं
मण्यग्रमण्डपमनादृतनिम्नगाधम् ।
सुश्लिष्टमात्स्नदृषदुप्तसुधानुलेपैः
स्निग्धान्तरं रुचिनिरस्तसिताम्बुवाहम् ॥ २२ ॥

दुग्धाम्बुराशिदुहितुस्सदनं पुराणं
दीपाभसद्मनि सनूतनसंविधानम् ।
हृद्यं व्यधत्त सुभगत्वमुदीक्ष्य यस्य
नाकौकसामपि विमानमपास्तमानम् ॥ २३ ॥

गोदाभिदानमतुलं स तु भूरितेजो
दिव्यं वपुस्सुरुचिरं परिरभ्य दृग्भ्याम् ।
प्रत्नं विमानमपि साध्विवदमस्तु नूत्नं
दास्येन मामपि तनोतु महीकृतार्था (र्थम्) ॥ २४ ॥

सौमित्रिरित्थमनुसंहितधूर्विमानं
मुग्धं व्यधादनुपमानमनूनदीप्ति ।
यन्मौळिरुल्लसति रुक्ममयी स्वभासा
दूरावधूतमदनैकसहस्ररश्मिः ॥ २५ ॥

ज्योतिःपरं निगदितं निगमोत्तमाङ्गै-
र्दीपावभास इति दैवतमद्वितीयम् ।

तेनार्पितं सततदीपविधिं स्वभासे
सौहार्दभूरि चकमे किमिदं महत्त्वम्[1] ।। २६ ।।

स्वाद्यं त्रिसन्ध्यमपि चोदनमर्प्यमाणं
नैकप्रकारमतुलं परिपूतमग्र्यम् ।
पूर्णोऽप्यपूर्ण इव सादरमत्ति देवो
रामानुजस्य तदिदं पुरु भागधेयम् ।। २७ ।।

वेदान्तसूरिकवितार्किकसिंहसर्व-
तन्त्रस्वतन्त्रपदशब्दितमार्यवर्यम् ।
तद्दिव्यजन्मचरितैस्सह तं निदध्यौ
येनाधिकाञ्चि जगतामवनाय जातम् ।। २८ ।।

विश्वोपगीतमखिवैभवजन्मभूमिः
श्रीपुण्डरीकनयनो विदुषां वरेण्यः ।
आशीत्सुशीलसुभगो महितो(ता)न्ववायात्
भूदेवमौळिमहनीयपदारविन्दः ।। २९ ।।

तद्भूरनन्तगुरुरद्भुतबोधसीमा
तोताद्रिजानिरनवद्यगुणैकसिन्धुः ।
विद्याविहारनिलयान्विनतान्वितन्वन्
पृथ्वीपरिष्कृतिमणिर्नितरां रराज ।। ३० ।।

नित्यं स पद्मनयनाध्वरिसूरिसूनुः
कालेषु पञ्चसु हरिं रमयन् स्वधर्मैः ।

1. बत पारतन्त्र्यम्

निन्ये दिनानि बहुलानि पुराणवाणी
मौळ्यर्थचिन्तननिरन्तरमोदसान्द्रः ।। ३१ ।।

रामानुजीयमतुलं समयं धरण्यां
विस्तारयन् वृषगिरीन्दुरनन्तसूरेः ।
राद्धान्तधुर्यमनघं तनयं वितन्वन्
वाचं जगाद ललिताममृतायमानाम् ।। ३२ ।।

भाद्रोत्सवे(वो) वृषगिरौ भविता महीयान्
आनन्दनो मम विरिञ्चिमुखैः प्रणीतः ।
आगम्यतां तदुपसेवनसादरेण
दारान्वितेन भवता भवुकं ततस्स्यात् ।। ३३ ।।

स्वाप्नं वचो मुरहृतस्स निशम्य मान्यं
जाग्रत्स्मयन् सुकृतिनं परिचिन्तयन् स्वम् ।
पत्न्यै वदन्निदमुदारमनाः प्रतस्थे
साकं तया वृषगिरीशकु(गु)रूत्सवाय ।। ३४ ।।

नारायणाचलमणेर्विततं प्रतीतं
स ब्रह्मणा रचितमुत्सवमुत्सुकस्सन् ।
उद्वीक्ष्य हर्षमतुलं दधदन्तरङ्गे
दारैरुवास कतिचिद्दिवसान् वृषाद्रौ ।। ३५ ।।

तस्मिन् कदाचन रमानिलयो दयाळु-
र्बिभ्रत्तनुं द्विजनुषः प्रथयन्नतार्थम् ।
तद्वासभूमिमवगाह्य बुधाय तस्मै
घण्टां ददौ स्वपरिचारविधौ प्रतीताम्[1] ।। ३६ ।।

---

1. प्रयुक्ताम्

औत्सुक्यभारभरितः कमलाक्षसूनुः
पत्न्यै ददौ वृषमहीधरबन्धुघण्टाम् ।
सा वीक्षणावसर एव तदङ्कसक्ता-
नादर्शि नाद्भुतमिदं परमस्य भूम्ना ॥ ३७ ॥

नैशां दशामनुपमामनुभाव्यसूरि-
र्वध्वै वदन् हृदि मुदं प्रचुरां दधानः ।
उत्थाय सान्ध्यमखिलं रचयन् स्वधर्मं
पत्युः प्रियाय समुवास निवासभूमौ ॥ ३८ ॥

प्रातर्वृषाद्रिनिलया जलजाक्षसद्म
सम्प्राप्य तामनवलोक्य मुरारिघण्टाम् ।
किञ्चेतदद्भुतमिदं न कदाचिदेवं
हा हन्त हेति भयभारयुता जगर्जुः ॥ ३९ ॥

कश्चिद्यती समवलोक्य भयं जनानां
बुध्वा रमानिलयचेष्टितमाह सभ्यान् ।
प्रादादनन्तगुरुसूनुतया स्वघण्टां
पद्मासखो निखिललोकरिरक्षिषार्द्रः ॥ ४० ॥

एतां प्रवृत्तिमुपलभ्य तदा महान्तः
काञ्चीविहारिबुधवासभुवं विगाह्य ।
तं वीक्ष्य दिष्टभूतमानमनादि कृत्वा
यातास्तदद्भुतकथामृतपानहृष्टाः ॥ ४१ ॥

श्रीमन्ननन्तगुरुरप्यथ पादपद्मं
नत्वा वृषागममणेरिभशैलबन्धुम् ।

नेतुं बुधो धृतमतिः प्रियया वृषाद्रेः
प्रस्थाय वासभवनं निजमाससाद ॥ ४२ ॥

कर्मात्तजन्मनि परं दशमास्यगाथा
स्वेच्छावतारभृति नेति पुराणवाचाम् ।
तात्पर्यमुज्ज्वलयितुं च दधार दिव्यं
गर्भं षडब्दयुगळं विबुधाम्बुजाक्षी ॥ ४३ ॥

तोताद्रिवामनयना तदनु प्रकृष्टं
प्रासूत सूनुमुपमानकथाविदेश्यम् ।
तिष्ये युगे पथलवाब्दतया प्रतीते
शुक्ले च भाद्रपदमाधवतारकायाम् ॥ ४४ ॥

अत्यद्भुतानुपमदीधितिधूतभानुं
सौमुग्ध्यसारविमुखीकृतमीनकेतुम् ।
आजानबोधसुभगं तनयं सवित्री
सामोदमक्षियुगळेन तदा ददर्श ॥ ४५ ॥

विद्वाननन्तगुरुरात्मजजन्म भव्यं
स्नातश्शुची रचयति स्म सुतस्य वैधाम् ।
जातक्रियां धरणिदेवकदम्बकेभ्यः
प्रादात् प्रदेयमपि कोकनदाक्षतुष्ट्यै ॥ ४६ ॥

एकादशेऽहनि पिता करुणातरंगात्
पद्मापतेरुदयमात्मभवस्य वीक्ष्य ।
नामक्रियाविधिपरस्तमलञ्चकार
सूनुं महत्सदसि वेङ्कटनाथनाम्ना ॥ ४७ ॥

अप्राशयन्मधुघृताक्तदधिप्रकृष्टं
क्षारादिदूरमदनं भगवद्वितीर्णम् ।
मास्यष्टमे विमलधामनिधिं तनूजं
शास्तुर्निदेशनिरतो जलजाक्षसूनुः ।। ४८ ।।

अब्दं तृतीयमथ सावनमाप्य चौलं
सूनोर्व्यधायि गुरुणा दिवसे शुभंयौ ।
कर्मो(र्मौ)पनायनमचीकरदात्मन(ज)स्य
साधूपलक्ष्य जननाष्टमवत्सरत्वम् ।। ४९ ।।

श्रीवेङ्कटेशगुरुरादिमभारतीनां
भेदान् जगौ कथकहंसनवाम्बुवाहात् ।
रामानुजान्निजगुरोरनुवादमत्र
सापेक्षबुद्धिरपराह्य(ण्य)पि शासनानि ।। ५० ।।

काणादपाणिनिकुमारिलतन्त्रवीथ्यां
तेने गतागतिमसौ कविवादिसिंहः ।
श्रीमद्यतीशितृवचोऽमृतवारिराशि-
वीचीसदापरिचितिं स गुरोर्व्यधत्त ।। ५१ ।।

व्यासः श्रुतौ मनुरसौ स्मृतिषु प्रगल्भो
वल्मीकभूर्गिरि पुरातनभाषितान्ते ।
बोधायनः पदपथेऽपि च पाणिनिस्स्या-
न्न्याये कणादमुनिरित्यमुमाहुरार्याः ।। ५२ ।।

वृत्तं वयोऽभिजनमात्मसमं विपश्यन्
कस्याञ्चिदेणदृशि तां निगमान्तसूरिः ।

पाणिग्रहेण चरितार्थधियं व्यधत्त
रामो विदेहतनयामिव मुग्धरूपाम् ।। ५३ ।।

आस्ये हयस्य कमलानिलयस्य मन्त्रं
विज्ञाननाडिधमनं स जजाप सूरिः ।
तेनाञ्चितो हयमुखः पुरतोऽस्य तिष्ठन्
गम्भीरवाग्भरझरीभरितं चकार ।। ५४ ।।

त्रय्यन्तपान्थबुधमौळिमणिर्बुधेन्द्र-
श्चक्रे कुदृक्कुलमतङ्गजकेसरीन्द्रान् ।
ग्रन्थान् सुनीतिपरिशुद्धिमुखान् गभीरान्
स्तोत्राणि चाकृत परार्थनुतादिमानि ।। ५५ ।।

उद्वीक्ष्य वेङ्कटगुरौ कथकाग्रणित्वं
रस्यातिमुग्धकवितातुललास्यलीलाम् ।
विद्वत्कुलं निखिलमप्यददादमुष्मै
काञ्चीपुरे कथ(वि)कतार्किककेसरीत्वम् ।। ५६ ।।

त्रय्यन्तसूरिरनवद्यकलाप्रमत्तं
विद्यावनं निजयशोऽसहनं जिगाय ।
दुर्वादिगर्वविपिनानलवारिवाहै-
र्वाचाम्भरैरथ स तं प्रगृणन् जगाम ।। ५७ ।।

नैस्पृह्यवर्त्मनि परस्सदृशोऽप्यनेन
नेत्यत्र सिंहगिरिबन्धुमहोत्सवाय ।
यातेन सा विजयपुर्यधिपाय दत्ता
प्रत्युक्तिरार्यमणिना जगतां प्रमाणम् ।। ५८ ।।

तीर्थेषु दैवतनदीयमुनादिमेषु
स्नात्वा निषेव्य विषयान् कमितू रमायाः ।
दिश्युत्तरत्र कथकानखिलान्विजित्य
प्रापागमान्तगुरुरात्मपदं विनम्रैः ।। ५९ ।।

पक्षेपतत्त्वमधिपे विदुषां विदेश्यं
वाच्यं किमत्र सति भूमिभृतस्सभायाम् ।
विद्यावनेन सह मध्वमुनेर्विवादे
ताटस्थ्यभूमिगुरुशेखरभाषितेऽर्थे ।। ६० ।।

वादाद्रिदारणपविः कविवादिदन्ति-
कण्ठीरवो गुरुरवाप्य पुरीं फणीन्दोः ।
मन्त्रान् जपन् हयमुखस्य पुनर्व्यतानी-
द्वाहास्यसन्नुतिमुखान् प्रथिता(न्)प्रबन्धान् ।।६१।।

पुर्यां स तत्र रुचिरं निवसन् विपश्चित्
पद्माक्षदिव्यसदनानि भजन्क्रमेण ।
आनन्दसान्द्रमतिरागममौळिमान्यं
रङ्गं जगाम मनुवंशनरेन्द्रदैवम् ।। ६२ ।।

श्रीरङ्गसूरिकुलभाषितमानतेन
मूर्ध्ना वहन् कविकथाहवधुर्यसिंहः ।
[श्री*]कृष्णमिश्रमधिकं कथयाञ्जिगाय
त्रय्यन्तदेशिकमणिर्द्विनवाहवादैः ।। ६३ ।।

उद्वीक्ष्य रङ्गनिलयः कवितार्किकेन्द्रे
तत्तादृशीं समयधूर्वहतां दुरापाम् ।

अन्यैर्निजाप्तमुखतः प्रददावुदारं
त्रय्यन्तदेशिकपदं विबुधाय तस्मै ॥ ६४ ॥

श्रीरङ्गनाथसहधर्मचरी गुरुं तं
साक्षात्कृताखिलकलाविभवं विभाव्य ।
तत्पारितोषिकमदाद्भुवि सर्वतन्त्र-
स्वातन्त्र्यरूपमखिला यदुदाहरन्ति ॥ ६५ ॥

कृत्वा पदावनिसहस्रमसीमबोधो
वेदान्तसूरिरमुना परदौर्ललित्यम् ।
दूरीचकार स तु रङ्गधुरीणविद्वत्-
सामोदसंस्तवपदं समभूदनेन ॥ ६६ ॥

रङ्गे कदाचन गुरुर्यवनार्वबृन्दै-
रापीडिते करुणया तदपाचिकीर्षुः ।
भक्त्या जगावभयसन्नुतिभारतीभिः
रङ्गाधिपं स च ददावभयेन रक्षाम् ॥ ६७ ॥

सेतौ रघूद्वहकृते स गुरुर्निमग्नो
नत्वा शठारिमथ भूमिभृतं वृषाद्रेः ।
श्रीयादवाचलमणिञ्च जगाम काञ्चीं
तत्सेवनोत्सुकविपश्चिदपश्चिमार्द्राम् ॥ ६८ ॥

कश्चिज्जिगीषुरमतिः कविवादिसिंहं
सासूयमुल्बणविषान् विजहौ भुजङ्गान्
तानाक्षिपद्गुरुरनल्पमदान् स्वभूम्ना
तेष्वेकमर्पयति कारुणि[कः*]स्म तस्मै ॥ ६९ ॥

गीतागुरोर्निरुपमानवचोझरीभिः
श्रीसंयमीश्वरसुभाषितधोरणीभिः ।
कार्यात्मजोदितसुधारसवाहिनीभि-
र्निन्ये दिनानि गुरुरागमबोधिनीभिः ॥ ७० ॥

श्रीलक्ष्मणार्यसमयैकजयध्वजेन
रेजे सुतेन वरदेन गुरुर्गुरूणाम् ।
दुग्धाम्बुधिः स्वमणिनेव निजांशुनेव
भास्वान्मणिः स्वमहसेव गिरेव सूरिः ॥ ७१ ॥

जागर्त्यसौ गुरुरिहाखिलभागधेया-
दर्चातनुं समवलम्ब्य मनोज्ञरूपाम् ।
तस्मै तु तं(तां)खलु कृतं(तां)भुवि मानवेन
धन्येन तत्परिचरामि तमालयेन ॥ ७२ ॥

सौमित्रिरित्थमनुसंहितबुद्धिरार्यं
त्रय्यन्तसूरिमभितः प्रणमन् प्रतस्थे ।
तं लोकदुर्गविदितं जगतः प्रदेशं
स्वां ज(स्वजं)न्मभूमिमपि यं समुदाहरन्ति ॥७३॥

यत्रातुला मनुजवाहनसम्पदास्ते
विश्राणनोपहतभानुसुता वदान्याः ।
यत्रासते मणिसुरालयबृन्दबन्धे
बद्धादरा इव महीपतयः पुराणाः ॥ ७४ ॥

आढ्यांस्तृतीयकुलजानखिलान् कृतार्थान्
कर्तुं समीहितमसौ प्रथयाम्बभूव ।

तद्भावसंकलनमात्रविवृद्धमोदा-
स्तस्मै ददुर्निरवधि धनपुञ्जमर्य्याः ॥ ७५ ॥

विश्राणितानि स धनानि समोदचेता
गृह्णन् मनोरथमवाप्य जगाम काञ्चीम् ।
कौतस्कुतादिकुमतिद्विपसिंहसूरि-
पादारुणाम्बुजसिषेविषयानुषक्तः ॥ ७६ ॥

नत्वा चिरन्तनवचोमकुटार्य्यपादौ
धन्येन तेन सुहृदा विपुलं व्यधायि ।
सद्मोपमानरहितं स्मयदं जनानां
प्राकारमण्टपसभामणिगोपुराद्यैः ॥ ७७ ॥

यद्गोपुराग्रिमदरीसदनावगाहा-
स्तारावहन्ति नवमौक्तिकहारलीलाम् ।
यन्मुग्धताहृतमना न चरन्मृगाङ्को
जागर्ति नायकमणिद्युतिमादधानः ॥ ७८ ॥

नाकौकसो निजसरित्सलिलावगाहा-
स्तुङ्गानि यत्र शिखराणि हिरण्मयानि ।
मध्ये तरङ्गमवलोक्य करेण(रैश्च) नूनं
गृह्णन्ति रुक्मसरसीरुहबृन्दबुद्ध्या ॥ ७९ ॥

यत्स्फाटिकोपलविनिर्मितवप्ररेखा-
सुस्निग्धमुग्धतमभागविहारलोलाः ।
साधारणा मृगदृशस्त्रिदिवालयानां
हित्वा गृहानपि निजानुपयान्ति हन्त ॥ ८० ॥

त्वष्टानिदम्प्रथमभाषितशेखरार्यं
यत्रानमन् बहुळमञ्जुळशिल्पदाक्ष्यम् ।
उद्वीक्ष्य सत्रपमशिक्षत शिल्पविद्यां
नो चेत्कथापि कथमस्य भवेत्सुशिल्पे ॥ ८१ ॥

यद्दिव्यमन्दिरलसन्मणिपुञ्जनिर्यद्-
गम्भीरदीधितिकठोरकरप्ररोहात् ।
नक्तं रथाङ्गपतकास्सरसीरुहाणि
नित्यं हसन्मुखतया नियतं स्फुरन्ति ॥ ८२ ॥

दिव्यं विमानमभितो हृदयङ्गमानि
बिम्बानि चेतनदशानुकृतीनि द्रष्टुम् ।
पक्ष्म प्रतीपमवमृश्य सुधाशलोका
नूनं निमेषकथया विधुरा भवन्ति ॥ ८३ ॥

तत्रालये कविवदावदकेसरीन्द्रं
त्रय्यन्तसूरिमनवद्यकलाप्रसूतिम् ।
सौमित्रिरन्वहमुदारगुणं प्रणामै-
रानर्च काञ्च्युपगतस्त्रितयं समानाम् ॥ ८४ ॥

काञ्च्यां वसत्येवमुदारशीले
तस्मिन्सुमित्रातनयाभिधाने ।
श्रीरङ्गरामानुजदेशिकेन्द्रो
नमन्नुपागात्करिशैलसिंहम् ॥ ८५ ॥

श्रीरङ्गरामावरजो यतीन्दु-
र्ननाम देवं जगदेकनाथम् ।

पितामहोदञ्चितवाजिमेधे
येनोदभाव्युत्तरवेदिकायाम् ॥ ८६ ॥

अन्ते वसद्भिरनघैर्जितवावदूकै-
र्नत्वा मतङ्गजमहीधरमौळिबन्धुम् ।
दिव्यं तपोवनमुपागतमार्यसिंहं
सौमित्रिरानमनसंहृतिकर्म तेने ॥ ८७ ॥

ऊरीचकार मुदितः करिशैलबन्धु-
स्स्वात्मावनं गुरुमुखेन नतार्तिहारी ।
तस्मादनेन मम सा गतिरस्तु दिव्या
काञ्च्यामितीव स गुरुः कलयन्नुवास ॥ ८८ ॥

श्रीरङ्गलक्ष्मणमुनौ गुरुसार्वभौमे
दिव्यां पुरीमुपगते महनीयभूम्नि ।
सीमातिलङ्घि निखिलं जगदास वेदा-
स्तन्मौळयोऽपि गतधामतया ववल्गुः ॥ ८९ ॥

दिव्यां तनुं यतिवरेण मुदा विसृष्टां
सन्दर्शनादिमनिरस्तमहाघबृन्दाम् ।
सौमित्रिणा विरचिते महति न्यधत्त
बृन्दावने धरणिदेवकुलं विविक्तम् ॥ ९० ॥
रामानुजस्तदनु दैवतमात्मनीनं
त्यक्त्वा भुवं गतमुदीक्ष्य परामयोध्याम् ।
खिन्नः कृशः प्रतिदिनं प्रणमंस्तनुं तां
बृन्दावनं च दिवसाननयत्सुखेन ॥ ९१ ॥

नित्यं स कुण्डलिसरोवरतीर्थसेवी
नत्वा नतार्तिहरपादपयोजयुग्मम् ।
तद्दैवतान्यपि महीसुरमण्डलानि
रेजे मुदा रचितकिङ्करकृत्यधन्यः ॥ ९२ ॥

इति दासचरित्रे पञ्चदशस्सर्गः ॥

॥ श्रीमते रामानुजाय नमः ॥

## अथ षोडशस्सर्गः

तस्मिन् वसत्यमितभूमनि तत्र पुर्यां
एवं कदाचन विदेहसुता गदार्ता ।
मातङ्गभूधरमणेरनुचिन्तयन्ती
पादाम्बुजद्वयमनाकुलधीरुवास ॥ १ ॥

मातङ्गशैलरसिकः स्वपदं निनीषु-
र्मासादनन्तरमिमां जनकात्मजाताम् ।
तावन्निराकृतिविदूरगदामुदीक्ष्य
तेने गतिं तदवनाय दयापयोधिः ॥ २ ॥

आसीत्तुरीयमहिळा मृदुळा सुशीला
चक्रोज्ज्वला विनिहितात्मभरा मुरारौ ।
श्रीवेङ्कटाह्वयवती करिशैलनाथ-
स्सुप्तां जगाद गिरिमादरतो बलान्ताम् ॥ ३ ॥

काञ्चीपुरद्विरदबन्धनवीथिकान्ते
पश्चात्तनं सदनमस्ति महत्तमस्य ।
दासस्य कस्यचिदनुत्तमकीर्तिधाम्न-
स्सद्वर्तनीगतिजुषां प्रथमस्य पुंसाम् ॥ ४ ॥

य स्वात्मरक्षणभरार्पणतः कृतार्थः
कर्तव्यशेषविरहात् पुरुषार्थरूपम् ।
दास्यं सदा विरचयन् निलये मदीये
साकेतसूरिहृदयङ्गमवृत्तिरास्ते ॥ ५ ॥

स्वस्मिन्निरागसि जनावमतिर्यदि स्या-
दस्त्वेतदेवमधुना रसिकश्शरण्यः ।

लीलारसं वहति कर्मविपाकभाजा
तेनामुना तनुभृतेति मतिर्यदीया ॥ ६ ॥

यस्येन्द्रियार्थविरहस्तदुपागमो वा
खेदाय नैव न मुदे च परानुभूतेः ।
स्यादागमस्तदितरोऽपि गुणाधिकेषु
दास्यं तदुज्झनमपि स्वमनोऽनुरूपम् ॥ ७ ॥

स्वेनापराधसरणावनिवेशितेऽपि
पादे रुषां वितनुते यदि कोऽपि तस्मै ।
स्यामन्यजन्मनि समन्युरिति स्म शान्तिं
यः प्रार्थयत्यकपटेन हृदा मनीषी ॥ ८ ॥

दृष्टावरात्मपरमात्मगतिः परेषां
दृष्ट्वा फलान्तररुचिं तदुपायकृत्याम् ।
यस्सतपस्सकरुणः स्मयतेऽपि पुंसां
रत्नापणे महति काचरुचिं विपश्यन् ॥ ९ ॥

यस्यामलेन यशसा विपुलेन धौते
पूतावदातसुभगेन दिगन्तराळे ।
लोकान्तरेऽपि तमसां कुलमस्तगेहं
नूनं गुहागृहमवाप तमोमयानाम् ॥ १० ॥

ज्ञानी स मे प्रियतमोऽहमपि प्रियोऽस्य
तस्याङ्गना धृतगदा परतन्त्रवृत्तिः ।
गच्छाधुनैव सहकर्तुमितोऽबलायै
मन्ये तदीप्सितकृतिं विहितां मयीव ॥ ११ ॥

श्रुत्वा गिरं करिमहीध्रधूर्वहस्य
स्वापोदिताममृतवीचिमयीं प्रियेभ्यः ।
उक्त्वा च तां तदनु लक्ष्मणदासजाया-
साह्वाय वेङ्कटवधूस्वगृहात्प्रतस्थे ॥ १२ ॥

संप्राप्य काञ्च्युपगतं रघुजानुजार्यं
स्वाप्नं वचो निखिलतस्समुदीर्य तस्मै ।
यद्येवमीश्वरकृतं क्रियतां तथेति
तेनोदिता परिचचार पुराङ्गना ताम् ॥ १३ ॥

जानक्युदीक्ष्य विकृतं वपुरार्तिवृद्ध्या
प्रोवाच कान्तमिदमार्यं पुमान् पुराणः ।
एनां पुरा नयति धाम परं सहस्ये
नाथेऽहनि ध्रुवमतो रचयत्वनुज्ञाम् ॥ १४ ॥

उक्तस्तथैवमवलोक्य लघुप्रतीकां[1]
रामानुजः स्वमहिळां शिथिलां च तस्याः ।
सूक्तीस्सुधारसमयीः श्रवणाध्वनीना-
श्चक्रे कृपाघनगुरुप्रवरोपदिष्टाः ॥ १५ ॥

नैकस्वजन्मकृतकिल्बिषनिष्कृतिं यां
न्यासं वदन्ति तमवाप्य कृतार्थभावम् ।
प्राप्तान् नरान् मुरहरस्तनुते निनीषु-
स्सद्मात्मनः किमपि लक्ष्म वपुर्विमुक्त्यै ॥ १६ ॥

तस्यात्मनस्तनुविभेदिनि सङ्गतेऽह्नि
पूर्वोत्तराणि तदघानि निराकरोति ।

1. कृशप्रतीकां

पुण्यं तदन्यदपि संक्रमयन्प्रियेषु
तस्याप्रियेषु च दयानिधिरम्बुजाक्षः ॥ १७ ॥
उत्क्रान्तिमस्य विदधाति सरोरुहाक्षः
कीनाशयोधनिरपेक्षमुदारतेजाः ।
धातुश्शिवस्य सुरनेतुरिवान्तकस्य
स्वं वर्धयन् करुणया स्मरणं दुरापम् ॥ १८ ॥
वागादिमानि करणानि दशान्तरे तत्
प्राणे तमा(दा?)त्मनि तमप्यणुभूतबृन्दे ।
स्वस्मिन् परात्मनि च तं घटयन्मुकुन्दो
नाडीं शतोपरितनां नयति प्रतीताम् ॥ १९ ॥
अर्चिर्हुताशन इति प्रथितोऽथ देवः
पन्थानमेनमतिवाहयति स्वनेयम् ।
ऋद्ध्या स्वयानुपमया विनमन् स भीति-
स्संभावयन् चरमसाधननिष्ठमेनम् ॥ २० ॥
घस्रोत्तरायणशरत्पदवाच्यभूताः[1]
कालाभिमानरसिका विबुधा स्वसृत्या ।
सम्भावयन्ति विभवानुगुणोपचारै-
राराध्य मुक्तिपथजाङ्घिकमार्यमेनम् ॥ २१ ॥
वायुस्ततः परममुं नयति स्वमार्गं
हर्षावपूरिततनू रचयन् सपर्याम् ।
अन्वेष मुक्तिपथिक(थग)स्सुपथारथाङ्ग-
रन्ध्रोपमेन सरसीरुहबन्धुमेति ॥ २२ ॥

1. ...शरन्मुखशब्दवाच्याः

आडम्बरीयसुषिरोपमयैष सृत्या
सम्मानितो दिनकरेण यथाविभूति ।
आप्नोति चन्द्रमसमागममस्य दृष्ट्वा
साध्वावसानभुवमागतमानमन् तम् ॥ २३ ॥

चन्द्रो विमुक्तिपथयायिनमेनमेत्य
सीमातिलंघिमहिमानममर्त्यसेव्यम् ।
स्वाभिर्विभूतिभिरुदच्चर्य सृतिं स्वकीयां
सम्प्रापयत्यतुलयामलया च भक्त्या ॥ २४ ॥

संयाति दुन्दुभिबिलोपमया पदव्या
मुक्ते तु विद्युदभिमानि सुरस्समेत्य ।
आराध्य तं नयति पद्धतिमात्मवाह्यां
यं वैद्युतादिमपदैर्निर्गमा वदन्ति ॥ २५ ॥

पाशायुधः स्वनियतामवधिं पदव्या-
स्तं प्रापयत्यमुममानवनीयमानम् ।
संप्रीणयन् परमपूरुषपादपद्म
विन्यस्तरक्षणभरं विविधोपदाभिः ॥ २६ ॥

तन्मानसेन पथि नीतममर्त्यनाथः
पन्थानमात्मविहितं नयति प्रपन्नम् ।
नानोपदावितरणार्हणसंप्रणामै-
रच्चर्य समच्चर्य विनयादरभीतिपूर्वम् ॥ २७ ॥

अम्भोजभूरिमममानवनीयमानं
सूरिं प्रणम्य निखिलान् स्वविभूतिभेदान् ।

तस्मै समर्प्य रचिताञ्जलिरास्वमार्गा-
दन्वेति मोदभयभक्तिविनीतिसान्द्रः ॥ २८ ॥

भूतानि पञ्च निखिलाण्डगतांश्च लोकान्
क्रान्त्वार्चिरादिपथगोऽण्डकटाहभित्तिम् ।
सप्तावृतीरपि ततो विरजामुपैति
वैकुण्ठसीम्नि कलिताममृतस्रवन्तीम् ॥ २९ ॥

तत्रावगाह्य मधुरामलशीतलायां
नद्यां तनुं समवधूय हृदातिलङ्घ्य ।
संगादमानवकरस्य विधूतभाव-
स्सालोक्यमेति समुपैति सरूपताञ्च ॥ ३० ॥

दिव्यं नभो यदमराधिपदर्शनीयं
मूढैरगम्यममलाशयसूरिगम्यम् ।
कालैरकाल्यमितरैरकृतप्रकाश-
मत्यर्कहव्यवहदीप्तविशुद्धसत्त्वम् ॥ ३१ ॥

योगीन्द्रवाङ्मानसदूरसदातिशायि
नित्यानवद्यमहितातुलभोग्यताकम् ।
मुक्तस्तदेति विनतो रचिताञ्जलिस्सन्
अप्राकृतामृतमयानुपमानदेहः ॥ ३२ ॥

तत्रण्य(?) वारिधिमराख्यमपामधीश[1]-
मारामबृन्दमणिपर्वतवाहिनीश्च ।

1. ...मराख्यमथाम्बुराशि–

दृष्ट्वा तटाकमुखमन्यदयं प्रहर्षा-
दैरं मदीयमुपयाति सरस्सुधायाः ।। ३३ ।।

अश्वत्थमन्वयमुपैति मनोज्ञरूपं
नाम्ना तु सोमसवनं तममर्त्यवश्वः ।
आगत्य पञ्चशतमच्युतसंप्रणुन्नाः
कुर्वन्त्यलङ्कृततनुं कनकाम्बराद्यैः ।। ३४ ।।

तिल्यावनीरुहमुखानि गतो विमुक्त-
स्संप्राप्तसर्वरसगन्धतनुर्मुरारेः ।
सौरभ्यदिव्यरसदीधितिसंप्रवेशात्
नह्यच्छरीरगुणकस्समुपैत्ययोध्याम् ।। ३५ ।।

इन्द्रप्रजापतिपराम्बरदेवताभ्या-
मागम्यतामिति समोदमुदीर्यमाणः ।
अन्तःप्रयाति परमस्य पुरस्य मुक्तः
प्रत्युद्गतः स्तुतिपरैरनिमेषबृन्दैः ।। ३६ ।।

मध्ये पुरं मणिमहीधरतुङ्गसौधां
वीथीं प्रयाति स तदा विबुधाः पदाम्बु ।
अस्मै ददत्यमलदीपमुखैरमर्यः
प्रत्युद्गमं विरचयन्ति विमानमेति ।। ३७ ।।

ब्राह्मेन दिव्ययशसा भरितोऽयमुक्त-
स्संप्राप्य दिव्यमणिमण्टपमानताङ्गः ।
चण्डादिमैः कुमुदसूरिमुखैश्च दृष्ट-
स्सौहार्दपूर्वमुपयाति पतत्त्रिराजम् ।। ३८ ।।

वैकुण्ठदिव्यगुणवैभवचर्चयाढ्यै-
नित्यैर्निरन्तरमवाप्य सदो महीयः ।
तत्तत्पदेषु स निरीक्ष्य सुरान् समिद्धान्
भूषादिमान् भजति पंक्तिमथो गुरूणाम् ॥ ३९ ॥

सिंहासनं रुचिरदीधिति विश्वभक्तः
पर्यङ्करूपमयमेत्य गृहीतदेहान् ।
आधारशक्तिमुखतत्त्वकुलाधिदेवान्
पश्यन् प्रहृष्यति तदङ्गतया गृहीतान् ॥ ४० ॥

तत्राष्टपर्णमरविन्दममन्ददीप्ति
दिव्यं सकर्णिकमथाष्टदळेषु दिव्याः ।
योषा रमारमणचामरदास्यहस्ताः
नित्यां परामपि स पश्यति कर्णिकायाम् ॥ ४१ ॥

मुक्तस्ततो मणिसनाथफणासहस्रं
स्वच्छावदातरुचिरं पवनाशनेन्द्रम् ।
दृग्भिर्दयामयसुधारसवाहिनीभिः
पश्यन् तमक्षिसरणौ तनुते नताङ्गः ॥ ४२ ॥

सुस्पर्शसुन्दरसुगन्धिविशालतुङ्गे
भोगे महोरगपतेर्निहितात्मरूपम् ।
नित्याभिवन्द्यमभिगम्य स वासुदेवं
सामीप्यमेति गुरुशेखरदृङ्महिम्ना ॥ ४३ ॥

आकुञ्चितेन च पदेन विसारितेन
भान्तं स्वजानुफणिभोगनिविष्टपाणिम् ।

हस्तादृतारिदरमाकलितं प्रियाद्यैः
पद्माक्षमेष विषयीकुरुते सदाक्ष्णोः ॥ ४४ ॥

गम्भीरमञ्जुळसुशीतलदेवदृष्टया
दृष्टस्तदीयचरणौ शिरसा दधानः ।
प्राप्यतुलां मुदमवाप्य भुजङ्गतल्पं
पितृङ्कसङ्गततनूजनयेन भाति ॥ ४५ ॥

शुश्रूषणा भगवता वचनान्यमुष्य
पृष्टोऽसि कस्त्वमिति वक्ति परं पुमांसम् ।
दासोऽस्मि युष्मदवतारमहन्महिम्ना
जातो भवत्पदपथोरुहपार्श्ववर्ती ॥ ४६ ॥

तां शृण्वता गिरमनन्तशयेन पुंसा
दत्तां चिराभिलषितामपि शेषवृत्तिम् ।
प्राप्य प्रहर्षभरवारिधिवीचिमग्न-
स्सायुज्यमेति पुनरागमदूरदेश्यम् ॥ ४७ ॥

इत्थं निशम्य कमितुर्गिरमात्मनीनां
साध्वी विदेहतनया स्मयमानचित्ता ।
तस्मै नतिं विदधती गुरवे च हर्षात्
तत्याज देहमभजत्कमलाक्षधाम ॥ ४८ ॥

वध्वा विधाय चरमं विधिमार्यशीलो
रामानुजः परमभागवतः प्रणुन्नः ।
बृन्दावनं गुरुमणेरपि पर्णशाला-
मानम्य तां हरिपुरीं प्रथितां[1] प्रतस्थे ॥ ४९ ॥

1. प्रति च

मध्येपथं कमललोचनदिव्यदेशा-
नालक्ष्य लक्ष्मणसुधीरतुलप्रमोदः ।
प्रापत् पयोधितनयालयनित्यसेवा-
सान्द्रार्यमण्डलवृतां हरिराजधानीम् ॥ ५० ॥

रामानुजो हरिपुरीकलितावतारं
पद्मानिवासमधिगम्य परं कृतार्थः ।
नत्वा पदाम्बुरुहमस्य निधाय चित्ते
देवं जहर्ष करुणामृतवारिराशिः ॥ ५१ ॥

सौमित्रिरच्युतकृपोपचयावबोधा-
स्तीर्थानुलेपतुळसीशठवैरिमालाः ।
विश्राणिता हरिपुरीमणिदास्यधुर्यै-
र्गृह्णन्नवाप निजधाम मुदा परीतः ॥ ५२ ॥

पुष्यामुनिप्रभृतिसूरिवचस्सुधाभि-
स्तर्षविधूतिकृदसौ भवतारकासु ।
तेषां रमानिलयहर्षणमाततान
दिव्योत्सवं सुबहुलैरुपचारबृन्दैः ॥ ५३ ॥

भाद्रोत्सवे निगममौळिगुरोः प्रतीते
चक्रे शताङ्गमहिमत्सु तमेषदासः ।
कृत्वा शताङ्गमुपमानकथाविदेश्यं
यद्वैभवस्सुमनसामपि दूरदूरः ॥ ५४ ॥

ऊरव्यपुङ्गवकुलैर्हरिराजधान्यां
प्राकारमण्टपसभालयगोपुरादीन् ।

तेनेऽनिलाशनमहीधरबन्धुतुष्टचै
नान्यन्मतं हि महतां कमलाक्षदास्यात् ॥ ५५ ॥

रामानुजः प्रतिदिनं कलयन् सपर्यां
स्वाराधनादरणनन्दसुतांघ्रिपद्मे ।
श्रीदिव्यसूरिवचनाशयचिन्तनेन
सत्सेवया च दिवसानि निनाय सार्धम् ॥ ५६ ॥

तस्मिन्निति प्रचुरतेजसि वर्तमाने
पद्मापतिः स्वपदपद्ममिमं निनीषुः ।
तस्मै सतामनवमाय ददौ मनीषां
स्वाङ्गप्रहाणसमयावगमैकधुर्याम् ॥ ५७ ॥

स व्याघ्रपुर्यधिपतेर्निगमान्तसूरे-
र्वङ्गीपुरान्वयविधोस्तनयं कृतीन्द्रम् ।
नत्वा ततः परमधामपदाधिरोह-
सोपानसूक्तिमश्रुणोदनुभूतिसिद्धचै ॥ ५८ ॥

भङ्गयन्तरेण कथयन्निजमुक्त्यवस्थां
वासस्थलीकतिपयैर्दिवसैर्भवेन्मे ।
वल्लयावृता तदपरत्र नयामि सर्वं
मञ्जूषिकादिकमिति स्वमुवाच मित्रम् ॥ ५९ ॥

पद्मालयस्य परमं सदनं विगाह्य
प्रातः कदाचन नमन् भगवत्पदाब्जम् ।
लब्ध्वा सतीर्थतुलसीसुमगन्धशेषा-
स्तस्मै जगाद विधृताञ्जलिरात्मभावम् ॥ ६० ॥

इच्छामि चक्रसरसीरुहशङ्खचिह्नं
धर्तुं नतेन शिरसा तव पादपद्मम् ।
श्रीमन्न मामिह विधेहि नतार्तिहारिन्
कारुण्यदुग्धजलधे वृषभाचलेन्दो ॥ ६१ ॥

काञ्चीपुरी जिगमिषा बहुलोदिता मे
तत्प्रार्थयामि भगवत्परिचारधुर्यान् ।
सन्दीयतामनुमितिर्मयि शान्तचित्तै-
र्भाव्यं भवद्भिरिति चार्चकमाह दासः ॥ ६२ ॥

नत्वा महीं दिविषदो हरिपुर्यधीशा
नागांसि धीविरचितान्यखिलानि सोढ्वा ।
कार्या कृपातिकृपणे मयि चार्यमिश्रै-
रित्यब्रवीत्स विधृताञ्जलिरर्यधुर्यः ॥ ६३ ॥

प्रीत्यै सरित्पतिसुताकमनस्य दास-
स्सत्यो ददौ धनमुदारगभीरचेताः ।
प्रस्थातुकाम इव भानुकुलावतंसो
देवो वनं प्रचुरभव्यगुणाम्बुराशिः ॥ ६४ ॥

यद्यत्स्वयं व्यतनुताच्युत दिव्यदेशे
दास्यं त्रयी शिखरदेशिकधाम्नि चापि ।
तस्याखिलस्य सततस्थितिकांक्षयासौ
मूलं धनं व्यतरदद्भुतमुग्धशीलः ॥ ६५ ॥

त्रय्यन्तसूरिवचनामृतपानतृप्तो
देहप्रहाणधृतबुद्धिरमन्दधामा ।

श्रीरङ्गलक्ष्मणमुनीन्द्रपदाङ्घ्रितात्मा
कालप्रतीक्षणपरस्समवर्ततायाम् ॥ ६६ ॥

मृत्योरलक्षणतया भगवान्मुकुन्दः
किञ्चिन्निमित्तमुदभावयदस्य सोऽपि ।
हृष्टानुभाव्यमिदमित्यवधारितार्था-
स्सिद्धोपयामदिवसो मनुजो यथासीत् ॥ ६७ ॥

पीत्वाब्जनाभसलिलं गुरुपादतीर्थं
धृत्वा पवित्रतुळसीनळिनसृगादीन् ।
कृत्वा द्वयं वदनसीमनि लक्ष्मणार्यः
स्मृत्वा मुकुन्दगुरुपद्मपदे रराज ॥ ६८ ॥

चेतस्यधात्फलतया स हुताशवारौ
श्वेतच्छदोदगयने शरदं समीरम् ।
भानुं निशाकरतटिद्वरुणान्महेन्द्रं
धातारमध्वनयनाधिकृतं क्रमेण ॥ ६९ ॥

दध्यौ स दिव्यनगरीं सरितोऽवगाहं
विद्युत्समन्वयमथाष्टगुणोपलम्भम् ।
शय्याधिरोहणममर्त्यपतेरवाप्तिं
भोगे च साम्यमपुनर्जननानुषङ्गम् ॥ ७० ॥

तिष्ये मधौ धवशरन्मिथुने मुकुन्दं
ध्यायन् सहास्त्रपरिकर्मवधूपरीतम् ।
त्यक्त्वा तनुं रघुसुतावरजः प्रपेदे
तद्धाम यद्दिविषदामपि दूरपारम् ॥ ७१ ॥

देहं यशोमयमवाप्य सदाभिरामं
रामानुजो विबुधनन्द्यनिजा पदा नः ।
उर्व्यां च रञ्जयति निस्पृहभावशान्ति-
क्षान्त्यादिमङ्गलगुणावलिवारिराशिः ॥ ७२ ॥

आचन्द्रतारमियमस्तु कथा धरण्यां
हृष्यन्तु भूदिविषदो भगवत्प्रधानाः ।
धर्मोवनावुपचयं भजतान्निवृत्तः
कृष्णो मुधा कवितया वहतु प्रहर्षम् ॥ ७३ ॥

श्रीरङ्गलक्ष्मणमहामुनिपादपद्म-
सेवैकधन्यहृदयो महदेकदासः ।
श्रीशैलसूरिमिदमारचयाञ्चकार
रामानुजार्यचरितं महतां निदेशात् ॥ ७४ ॥

साधवो भुवि वसन्ति रसज्ञा
वारिजाक्षपरवैभवविज्ञाः ।
तेन मे कृतिरियं चरितार्था
लक्ष्मणार्यचरितादरणार्था ॥ ७५ ॥

इति दासचरित्रे षोडशस्सर्गः ॥
दासचरितं समाप्तम् ॥

## ग्रन्थकृत्प्रशस्तिः

*श्रीशैलार्यमुखारविन्दविगळद्वाक्चातुरी माधुरी
माध्वीस्वैरसमोदवर्णनमसौ रामानुजाख्यः कृती ।
कारं कारमनन्यवाङ्मधुरसास्वादस्मृतिर्भृङ्गराट्
तृप्तिं वाङ्मनसातिदूरपथगां गच्छन्दरीदृश्यते ॥ १ ॥

श्रीशैलाह्वयसूरिवक्त्रसुशरद्राकानिशाधीशकृत्-
प्रोद्यल्लक्ष्मणदासदिव्यचरितस्तोकामलज्योत्स्निकाम् ।
पायं पायमसौ चकोरशिशुको रामानुजाख्यः स्वयं
श्रीसौन्दर्यकराग्रहारवसतिस्तोतुष्यते सम्प्रति ॥ २ ॥

प्रत्यूषः प्रथमानभानुविकसत्पाथोजपारम्परी
मन्दस्यन्दिमरन्दसारसमताप्रेन्धानवाक्सम्पदः ।
श्रीरामानुजदासजन्मचरितप्रख्यापिकां सत्कृतिं
श्रीशैलार्यमणेर्निरस्य विबुधास्तन्द्रालुतां पश्यत ॥ ३ ॥

---

*अत्रेदमाभाति—प्रकृतग्रन्थसमाप्त्यनन्तरं ग्रन्थकर्तुः श्रीशैलार्यस्य प्रशंसा-रूपं पद्यत्रयं दृश्यते । इदञ्च पद्यत्रयं प्रायशः ग्रन्थकर्त्रा न कृतं स्यात् । यतः कोऽपि पण्डितः लोके आत्मानमेव न तथा प्रशंसति । अतः इदं केनापि लिपि-केन तद्ग्रन्थास्वादनजनितभक्तिभरितेन श्रद्धया कृत्वा अन्ते संयोजितं स्यात् इति ।

# दासचरितश्लोकानामनुक्रमणिका